८८

…ालोत्पादक-श्रीपूज्य-जैनाचार्य-श्रीबुद्धिसिंहसूरिभ्यो नमः।

[stamp] श्री … सिटी … बाजार

अर्हम्

श्रीचन्द्रसिंहसूरिजैनग्रन्थमाला (१)

श्रीरूपचन्द्रकविविरचितम्-

# गौतमीयमहाकाव्यम्।

श्रीपूज्यजैनाचार्यश्रीचन्द्रसिंहसूरिपादपङ्कजभ्रमरायमाणेन मुनिश्रीकृष्णविजयसतीर्थ्येन पण्डित-काशीनाथेन संशोधितम्।

तच्च
(वाराणस्यां)
वडालीग्रामनिवासिना श्रेष्ठीबेचरदासात्मजेन पूनमचन्द्रेण श्रीलक्ष्मीनारायणयन्त्रालये मुद्रयित्वा प्रकटितम्।

वीर सम्वत् २४४२.

मूल्यमष्टावाणकाः

ग्रन्थमालोत्पादक-श्रीपूज्य-जैनाचार्य-श्रीबुद्धिसिंहसूरिभ्यो नमः ।

अर्हम्

श्रीचन्द्रसिंहसूरिजैनग्रन्थमाला (१)

श्रीरूपचन्द्रकविविरचितम्-

# गौतमीयमहाकाव्यम् ।

श्रीपूज्यजैनाचार्यश्रीचन्द्रसिंहसूरिपादपङ्कजभ्रमरायमाणेन मुनिश्रीकृष्णविजयसतीर्थ्येन पण्डितकाशीनाथेन संशोधितम् ।

तच्च

( वाराणस्यां )

वडालीग्रामनिवासिना श्रेष्ठीबेचरदासात्मजेन पूनमचन्द्रेण श्रीलक्ष्मीनारायणयन्त्रालये मुद्रयित्वा प्रकटितम् ।

वीर सम्वत् २४४२.

मूल्यमष्टावाणकाः

प्राप्तिस्थानम्—

श्रीचन्द्रसिंहसूरि जैनग्रन्थमाला ओफीस

ठि० रामघाट जैन मन्दिर,

बनारस सिटी।

# प्रस्तावना

॥ ॐ नमः ॥

निर्याणनिगमार्गलाऽज्ञाननिशावर्मनिवारणनभोमणेरस्य गौतमीयमहाकाव्यनामकस्य ग्रन्थस्य प्रणेतारो विश्वपण्डितमण्डलीमण्डितपण्डिततमाश्चश्वचारुचातुरीचर्चितचेतश्चिचेतश्चमत्कारकारिसिद्धान्तौघाः कविचक्रसहस्रदर्शनाः पवित्रदर्शनाः पञ्चजनपाललब्धप्रतिष्ठाः प्रखरखरतरगच्छाधिराजा यतिपुङ्गवाः श्रीरूपचन्द्रकवयः पापपङ्कप्रक्षालनाम्भसा सौवदर्शनेन, उपशमरसपीयूषवर्षिण्या वाचा, पवित्रपादपङ्कजेन च, कदा कतमां कीयतीश्च सरत्नां रत्नाकरवलयां वसुमतीं, कांस्कान् जनांश्च पावयाञ्चक्रुरिति जिज्ञासूनां जिज्ञासाऽस्यैव ग्रन्थस्य प्रशस्त्यवलोकनेनैव प्रशाम्यतु; तथा च प्रशस्तिः—

संवच्छैल-वियद्गजोडुपमिते मासे सहस्यादिमे
पक्षे दक्षसुताऽधिनाथदिवसे शुद्धे तृतीयातिथौ ।
श्रीमद्योधपुरे कमध्वजरवौ श्रीरामसिंहे नृपे
श्रीमच्छ्रीजिनलाभसूरिगणभृद्राज्ये पुनर्धार्मिके ॥ १ ॥
विद्याचारवरे गणे खरतरे श्रीक्षेमकीर्त्यन्वये
संजाता भुवि शान्तहर्षगणयः श्रीवाचकाख्याभृतः ।
तच्छिष्या जिनहर्षनाममुनयो वैरङ्गिकाग्रेसराः
तच्छिष्याः सुखवर्धना अपि दयासिंहास्तदीयास्तथा ॥२॥
तच्छिष्योऽभयसिंहनामनृपतेर्लब्धप्रतिष्ठो महा-
गम्भीरार्हतशास्त्रतत्त्वरसिकोऽहं रूपचन्द्राह्वयः ।

---

१ निर्याणम्=मोक्षः । २ दर्शनं=चक्षुः । ३ विक्रमीये १८०७ । ४ सहसि=मार्गशीर्षे । ५ जोधपुर इति भाषायाम् ।

प्रख्याताऽपरनामरामविजयो गच्छे स दत्ताख्यया
काव्येऽकार्षमिमं कवित्वकलया श्रीगौतमीये श्रमम् ॥ ३ ॥
दोषाः शब्दसमुद्भवाः कतिपयालंकारदोषाः पुनः
पद्येष्वेषु मम प्रमादवशतश्चेत् संभवेयुः क्वचित् ।
गीतार्थास्तु तथापि युक्तिकविताकार्ये श्रमं प्रेक्ष्य मे
साधो ! साधुकृतं त्वयेति ददतामुत्साहमेवेप्सितम् ॥ ४ ॥

एतेन ग्रन्थकाराणामष्टादशशताब्द्यादिभूतं सप्तदशशताब्द्यन्तभूतं च विद्यमानत्वं, योधपुरनाम्नि[1] नगरे काव्यरचनया, खरतरगच्छीययतीनां प्रायशो मरुदेशीयत्वेन च, एषामपि प्रायेण मरुदेशीयत्वं चानुमीयते ।

अनेकग्रन्थपर्यालोचनेनाऽपि न खलु प्रशस्त्या ऋतेऽन्यत्किमप्याविरभूत्, येन तत्रभवतां कविकुलपतीनामल्पमपि पवित्रं चरित्रं विरचय्य जिज्ञासमानानां सज्जनानां जिज्ञासां परिपूरयामीति ।

दूरीकृतनैकजनदारिद्र्यस्याऽनवद्यामोघवाचः साधुचक्रसेव्यमानस्य मोहनमुन्यपरनामविख्यातकस्य मुनिमोहनलालमहात्मनः, अवधीरितकोविदसंघातस्य वादिकुञ्जरकेसरिदिग्मण्डलाचार्यश्रीबालचन्द्रसूरेश्च, गुरवः श्रीरूपचन्द्रा ग्रन्थकर्तृतो भिन्ना एव प्रतिभान्ति; तेषां कव्युपाधिरहितत्वात्, अर्वाचीनत्वात्, ग्रन्थकाराणां प्राचीनत्वाच्च । ग्रन्थप्रणेतॄणां प्राचीनत्वख्यापनाय ग्रन्थकृत्प्रशस्त्या ग्रन्थटीककक्षमाकल्याणकृतप्रशस्त्या चालम्, तथा च टीकाकारप्रशस्तिः ।

बाहुज्ञानवसुक्ष्माप्रमितिजे[2] वर्षे नभस्युज्ज्वले-
कादश्यां विलसत्तथौ कुमुदिनीनाथान्वितायामिह ।
श्रीमज्जेसलमेरुनाम्नि[3] नगरे श्रीमुलराजेश्वरे
राज्यं कुर्वति यादवान्वयरवौ सन्न्यायमार्गाश्रिते ॥ १ ॥
श्रीदेवार्यपदाब्जसेवनपटुश्रीमत्सुधर्मान्वये
पूज्यश्रीजिनचन्द्रसूरिमुनिपे गच्छेशतां बिभ्रति ।

---

१ जोधपुर इति भाषायाम् । २ विक्रमीये १८५२ । ३ जेसलमेर इति भाषायाम् ।

श्रीमत्पाठकरूपचन्द्रवचसामर्थप्रकाशे क्षमा
रम्यासौ परिपूर्णतामभजत व्याख्या सदाख्यानभृत् ॥ २ ॥
प्रारब्धा निधिनेत्रसिद्धिवसुधासङ्ख्ये सुसंवत्सरे
यासीत् सद्गुणभाजि राजनगरे श्रीगुर्जरत्रावनौ ।
पूज्यश्रीजिनचन्द्रलाभसुगुरौ सैद्धान्तिकानुत्तरे
सद्बुद्ध्या समयोचितेन विधिना गच्छावनं कुर्वति ॥ ३ ॥

त्रिभिर्विशेषकम् । इति ॥

सुष्ठुतरं सुविहितं च सुरासुरनरेन्द्रवृन्दवन्दितपादपद्मस्य सिद्धार्थराजकुलशेखरस्य शरदिन्दुसुन्दररुचेर्दुर्वारसंसारपारावारतरणप्रवहणप्रकाशस्य जन्मक्षणक्षण एव वामपादाङ्गुलजनितामराचलकम्पनचमत्कृतसौधर्मप्रभृतिपुरन्दरस्य तत्रभवतो भगवतो जगद्गुरुश्रीवीरप्रभोरमलकेवलज्ञानादारभ्यातिकल्पद्रुमकामघटचिन्तामणेर्लब्धिनिधेस्तृणीकृतनिकेतनस्य गोतमगोत्रमुकुटायमानस्य श्रीइन्द्रभूतिगणधरस्य तर्जितागण्यप्राज्ञव्यूहानामग्निभूतिवायुभूतिव्यक्त-सुधर्म-मण्डित-मौर्यपुत्राऽकम्पिताऽचलभ्रातृ-मेतार्य-प्रभासगणधराणां च आऽऽर्हद्दीक्षं वर्णनम् ।

अनेन महाकाव्यलक्षणलक्षितेन नानाविधछन्दोऽलङ्कारगर्भितेनैकादशसर्गसर्गितेन पद्यबन्धपवित्रगौतमीयचरितेनैव तेषां लक्षणशास्त्रदक्षत्वं, तार्किकचक्रचक्रवर्तित्वं, साहित्यशास्त्रवैशारद्यं, षट्शास्त्रवेत्तृत्वम्, कविकुलमूर्धन्यत्वम्, आप्तराद्धान्तपारदृश्वत्वं च सुस्पष्टमेव प्रतिभासविषयमेति । नावगम्यते खलु कुन्देन्दुयशसो ग्रन्थकर्तारोऽस्माद्विनाऽन्यान् कांस्कान् ग्रन्थान् जग्रन्थुरिति ।

एतन्मुद्रणे वाराणसीस्थदिग्मण्डलाचार्यबालचन्द्रसूरिसंस्थापितकुशलचन्द्रजैनवृहत्पुस्तकालयस्यैकं नात्यशुद्धं सटीकमादर्शपुस्तकं दिग्मण्डलाचार्यनेमिचन्द्रसूरिपादाम्भोजचञ्चरीकायमाणविद्यालङ्कारपदमण्डितपण्डितहीरालालद्वाराऽलम्भि ।

---

१ विक्रमीये १८२९ । २ अमदावाद इति भाषायाम् । ३ प्रकाशः=सदृशः । ४ क्षणः=उत्सवः ।

तदेवमेकेनैव पुस्तकेन महता परिश्रमेण संशोधितेऽप्यस्मिन् ग्रन्थे यदि मतिमान्द्यदृष्टिदोषादिहेतुना यत्र कुत्रचित् काश्चनाऽशुद्धयः स्थिता भवेयुस्ताः परिशोधयन्तु सफलीकुर्वन्तु च मामकीनं परिश्रमं निसर्गसुन्दराः संख्यावन्तः सन्तः ।

संशोधनादौ दाठाह्वयग्रामनिवासिना श्रेष्ठिवर्यदीपचन्द्रतनुजनुषा पण्डितप्रभुदासेन समविषयसाहाय्यसमर्पणेनातीवोपकृतोऽस्मीति-तस्मै, मुद्रणव्ययदायकप्रतापगढनिवासीश्रेष्ठिवर्यघीयालक्ष्मीचन्द्र-शङ्करलाल-चन्दनलाल-भाचावतमन्नालालेभ्यश्च धन्यवादान् वितरामीति ।

निवेदयते—

मुनिश्रीकृष्णविजयसतीर्थ्यः काशीनाथः ।



श्रीबुद्धिसि[illegible]भ्यो नमः ॥

# श्रीगौतमीयमहाकाव्यम् ।

## प्रथमः सर्गः ।

श्रीराविरासीदिव दिव्यदीप्तिर्यस्यात्मनि ज्ञानमयी समग्रा ।
तीर्थप्रवृत्त्यै स च वीरनाथः प्रस्थातुमैच्छद् नगरीमपापाम् ॥ १ ॥
तावद् विदित्वाऽऽगममस्य धात्रीपतेरिव व्यन्तरदेवसंघः ।
इव क्रियावान् वनपालवर्गः ससर्ज रम्यं महसेनषण्डम् ॥ २ ॥
ऋतूंस्तदाऽन्यानपि वर्तमानः समाजुहावैकपदे वसन्तः ।
जगत्पतिं दर्शयितुं, जनः को न ह्युत्सहेतेश्वरदर्शनाय ?॥ ३ ॥
स्वराज्यदेशानिव राजवर्य्या विभज्य वृत्तानृतवोऽध्यवात्सुः ।
स्वसारसंभारमथाभिरामं विकाशयामासुरिनार्चनाय ॥ ४ ॥
प्राग् ये स्थिताः श्रीवियुतास्तदानीं सश्रीकतां प्रापुरगास्त एव ।
श्रियस्त्वलभ्याः समयेऽसुमद्भिः सर्वत्र सत्यो हि दशाविवर्तः ॥ ५ ॥
रागाक्तलोकेरितदृष्टिपातादिवाप्तरागैः प्रचिताः प्रवालैः ।
द्रुमा न पुंसां न मनांसि जह्रुर्मनोहरं किं न भवेत् समृद्धम् ?॥ ६ ॥
सुस्निग्धसान्द्राणि हरिच्छदानि प्रपश्यतां भूमिरुहोऽनिमेषम् ।
अत्यन्तभेदेऽपि तदा नराणामकारयन् देवगणैरभेदम् ॥ ७ ॥
वातोच्छलत्पल्लवहस्ततालै रोलम्बझङ्कारसुगीतनादैः ।
कारस्करास्तीर्थकरागमोत्थं निदर्शयामासुरिव प्रमोदम् ॥ ८ ॥
सूनुप्रसूताविव मोदमाप्ताः सूनोद्गमे चूततरोर्द्विरेफाः ।
एषामतो मङ्गलगायकानामिव ध्वनिर्माङ्गलिको जजृम्भे ॥ ९ ॥
ये सुन्दरीणां मुखसीधुलाभादामोदवन्तो बकुला बभूवुः ।
ते षट्पदानुन्मदयिष्णवः किं नासन् ?, यतः कारणकार्यसाम्यम् ॥ १० ॥
पश्यन्तु भो भोः प्रमदाकटाक्षान् मधुव्रतालीं मधु पाययन्तः ।
इत्यागमोक्तीरिव सौगतानां सत्यापयन्तस्तिलका विरेजुः ॥ ११ ॥

नितम्बिनीनां परिरम्भलाभः पादप्रहारोऽपि सुखाय येषाम् ।
तेऽशोकशाला विलसत्प्रवालाः स्मेराः सखायो न कथं स्मरस्य ? ॥१२॥
शश्वत् स्वरूपे किल यस्य गन्धः पुष्पोच्चयेष्वैक्षत चम्पकेषु ।
तत् तार्किकाः संशयिताः श्रुतौ किं वाङ्मात्रमेतद् न गुणा गुणेषु ॥१३॥
दूरोज्झिता या नवमालिकाली सा चैव सेव्या भ्रमरैर्बभूव ।
अहो अहो ? स्वार्थपरो हि लोकः स्वार्थं विना कोऽपि सुहृद् न कस्य ॥१४॥
सेवन्तिकानां मधुपानलोभात् कण्टाटनं न क्लमकारि जज्ञे ।
मधुव्रतानां, मधुपा जना यद् भूपातदुःखेऽपि सुखं लभन्ते ॥ १५ ॥
पुष्पश्रिया किंशुकपादपानामाच्छादिता पत्रदरिद्रताऽपि ।
नरः सुरूपः खलु दुर्गतोऽपि स्यादेव लोकस्य विलोकनीयः ॥ १६ ॥
निमन्त्रिता यत्र समृद्धिकाले वयं तदेभिर्न हि सौहृदं नः ।
इतीव पुष्पैर्हृदये स्वकीये कृतो मधूकेषु नु पर्णपातः ॥ १७ ॥
निरन्तरश्वेतसुमोच्चयान्तर्वपुर्विकाशा वरणा विरेजुः ।
सुक्लृप्तमुक्ताफलजालगुप्ता हरिन्मणीनां निवहा इवोच्चैः ॥ १८ ॥
रात्र्यर्धभागाद् दिवसार्धभागं यावद् दिशः सौरभमुद्वमन्त्यः ।
शिरीषपुष्पस्पृशि वाति वायावाह्लादयामासुरशेषलोकम् ॥ १९ ॥
भ्रमद्घटीयन्त्रजलप्रपातोच्छलत्किरच्छीकरशीतलासु ।
भूमिष्वधः पुष्पितपाटलानां सुखं निदद्रौ वनचारिलोकः ॥ २० ॥
रसं निपीयार्जुनमञ्जरीणां मत्तालिभिस्तत्र तथा जुगुञ्जे ।
यथा प्रमोदोद्धुरमानवानामुद्गायतां गानसहायताऽभूत् ॥ २१ ॥
समालिलिङ्गुर्गुरुभारनम्रा आम्रा भुवं लोललुलल्लताभिः ।
छायाप्रदानेन वनाभ्युपेतान् न्यमन्त्रयन् नृनिव सत्फलैश्च ॥ २२ ॥
नीलाभ्रलुम्ब्याचितहारहूरोच्चैर्मण्डपेष्वास्तृतचारुपत्राः ।
द्राक्षासवाघूर्णितताम्रनेत्राः कृतार्थयन्ति स्म वयो युवानः ॥ २३ ॥
प्रलम्बजम्बू-सहकार-रम्भाच्छायातिशीतोदकपुष्करिण्यः ।
सूर्यातपश्रान्त्यपनोददक्षा वनेऽत्र नासन् किमु सेवनीयाः ? ॥ २४ ॥
दिव्युच्छलद्दुन्दुभिनादमेघध्वनिर्मयूरान् मदयांचकार ।
तत्कूजनोत्कण्टकितैः कदम्बैरिहैव लेभे सुमनोवनश्रीः ॥ २५ ॥
आच्छादितो यद्यपि यत्नवृत्त्या यः केतकैः स्वप्रसवस्तथापि ।
स्वसौरभेनाथ स विश्रुतोऽभूद् महानुभावः क्व निलीयते यत् ॥ २६ ॥
सदर्घ्यमर्हन्ति सदाऽर्हणार्हा इतीव बुद्ध्वा कुटजैर्विदग्धैः ।
श्रीतीर्थनाथार्चनचारुहेतुं वितत्य पुष्पश्रियमाशु तस्थे ॥ २७ ॥

घनच्छटाच्छोटनतो घनोद्यद्वर्षासु हर्षेण यथोज्जजृम्भे ।
श्रीवीरनाथागमजातहर्षैस्तथा पुपुष्पे तरुभिः शिलीन्ध्रैः ॥ २८ ॥
कुत्रापि सान्द्रद्रुमजालगर्भे सरो विरेजे विमलाम्बुगर्भम् ।
वृतान्धकारेण सुखैकभूमिः समुच्छ्रिता शारदकौमुदीव ॥ २९ ॥
चन्द्रातपे मूर्च्छितचन्द्रपादैर्दीप्रोदबिन्दून् नलिनीदलेषु ।
इह प्रमत्ता जगलुः सलीलं मुक्ताफलभ्रान्तिमिता मरालाः ॥ ३० ॥
परस्परालिङ्गितमातुलिङ्गा दूराद्भेदं प्रतिदर्शयन्तः ।
परस्परप्रत्युपदाऽवदातं साधर्मिकस्नेहमिव प्रपन्नाः ॥ ३१ ॥
नगानुषङ्गात् तु वितानिताङ्गा वल्लीः समुल्लासवतीः समीक्ष्य ।
संयोगमिष्टैः सकलार्थसारं विलासिलोकोऽत्र विदाञ्चकार ॥ ३२ ॥
यथा रसो व्यापिपरद्धिमतौ पुण्ड्रेक्षुकाण्डेषु तदा तथैव ।
कालो जडश्चेत् सकलार्थसिद्ध्यै क्षमो भवेत् किं न पतिस्त्रिलोक्याः॥३३॥
प्राक् कुड्मलेषु प्रसवेषु पश्चाज्जनानुरागेण ततः फलेषु ।
दध्रे पदं दाडिमपादपानां यत् सुन्दराणां न हि सुन्दरं किम् ॥ ३४ ॥
विनापि कालं यदहो कुवलयः पुष्पैर्दलैः सान्द्रतरा बभूवुः ।
तद् दैवतैर्देवपतेः प्रभावो व्यक्तीकृतो भक्तिपरैः पुरैव ॥ ३५ ॥
सुस्वादुरूपैर्बदरैर्लुलन्त्यो यतो बदर्यो भुवमाससञ्जुः ।
तद् योगिनां चापि विलासिपुंसामासीद्रहोभूमिरिहाश्रितानाम् ॥३६॥
दलान्यपीष्ये खलु दुर्लभानि येषामगानां सुमनःफलैस्ते ।
स्वर्ताविवात्यन्तविलोकनीया भूता अहो भागवतोऽनुभावः ॥ ३७ ॥
पुष्पैः फलैर्वा युगपत् समिद्धे नीरन्ध्रनीलद्रुमकाननेऽस्मिन् ।
पतत्त्रिणस्तारविराववन्तो वत्स्यच्छुभोदर्कमिवाचिकीर्तन् ॥ ३८ ॥
विभ्राजमानाभ्रघटेव दूरात् तत् श्यामलाभं विपिनं बभासे ।
मेरोरिवानीय धृतं धरित्र्यामैन्द्रं वनं भक्तिभृतैरमर्त्यैः ॥ ३९ ॥
छायाभरेणोत्थितभूरुहाणां बभार सा भूरपि मेचकानाम् ।
त्रैलोक्यनाथक्रमधारणाय स्तृतैव गारुत्मतशक्रनीलैः ॥ ४० ॥
इत्थं तत्फलकुसुमच्छदाभिरामं तत्कर्माधिकृतकृती जिनेन्द्रभक्तः ।
स्वाप्तैः सह महसेनयक्षराजः स्वं षण्डं लघु परिमण्डयाञ्चकार॥४१॥

**इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये महसेन-**
**वनवर्णनो नाम प्रथमः सर्गः ।**

---

# द्वितीयः सर्गः ।

अथ पवनकुमारनिर्जराणां हृदि जगदीश्वरभक्तिराविवेश ।
रणरणकभृतां तया समेषां प्रतिमुखमाविरभूद् भारतीयम् ॥ १ ॥
कुरुत कुरुत रे रजोऽपनोदं क्षिपत सुदूरमदःस्थलादमेध्यम् ।
समवसरणहेतुनाऽस्य भर्तुर्वितनुत योजनमाशु भूमिशुद्धिम् ॥ २ ॥
द्रुततरमथ विक्रियाप्रसूतैर्भ्रमदनिलैर्वनभूतलादुदस्तः ।
विकिरदवकरोऽपि योजनान्ते निपतित उन्नतवप्रतामवाप ॥ ३ ॥
विपिनपरिमृजापराः समीरास्तदवकरोपरि चिक्षिपू रजांसि ।
भगवति भवतीह सन्निकृष्टे सरजसता तु कुतो न विप्रकृष्टा ॥ ४ ॥
सपदि तदनुगाः प्रभूतभूता ललनपरास्तुमुलक्रियाभियुक्ताः ।
इव खनकजना विभज्य भागैर्विषमतमामसृजन् समां धरित्रीम् ॥५॥
इति पवनकुमारदेवसंघे स्वकुलकृतौ कृतकृत्यतामवाप्ते ।
स्वपतिनयननोदनप्रणुन्नः स्तनित-तडित्सुमनोव्रजः ससर्ज ॥ ६ ॥
सिततनुजलभृद्विकुर्वणाभिर्दिवममरा धुरि चक्रुरभ्रलिप्तीम् ।
तदनुसलिलसंक्रमाभिरामं मृदुमुदिरं द्रुतमादृता विचक्रुः ॥ ७ ॥
मधुरमतितरां जगर्ज नभ्राडभिमुखगुञ्जनवायुघट्टनेन ।
उपलयुगलवत् समीरघर्षात् चतसृषु दिक्षु विदिद्युते च विद्युत् ॥८॥
तदनु तणतणायमानमेघोऽप्यविरलजालमसुस्रुवज्जलानाम् ।
उपशमभृदिवोदितं कषायं प्रसृमरमाशु रजो निनाय शान्तिम् ॥९॥
मृदपि घनजलाभिषिक्तभूमेः सुरभितरं बिभरांबभूव गन्धम् ।
प्रकटयति सहायतां हि यातं सहजगुणानपि वस्तुनो निमित्तम् ॥१०॥
गगनसृतजलच्छटाप्रपातापहृतरेणुमला द्रुमा विरेजुः ।
अखिलवनमपि प्रकाशप्राप्तं द्रवदिव रङ्गरसौ तदाऽऽबभासे ॥ ११ ॥
त्वरितमथ पिशाचभूतयक्षाद्यनिमेषसंघ इह स्वनाथनुन्नः ।
उपवनमनुयोजनप्रमाणां वलयमिलद्विधिनाञ्चकद् धरित्रीम् ॥ १२ ॥
शतयुगधनुरायतां जिनाङ्गोच्छ्रितिनिचितां खचितां विचित्ररत्नैः ।
विटपिवनमबाधयंस्तदूर्ध्वं मणिधरणीं निबबन्ध मध्यभागे ॥ १३ ॥
मधुकरकुललीढमञ्जरीकं चटुलरणद्ध्वनिघण्टिका-पताकम् ।
प्रमुदितमरुतस्तदन्तराले सुरुचिरमकार्षुरशोकचैत्यशालम् ॥ १४ ॥
प्रतिदिशमुपनीयते स्म तस्मात् कनकमयी चतुरासनी पुनस्तैः ।
श्रिय इव मिलिताः समस्तदिश्याः प्रभुचरणाम्बुजपर्युपास्तयेऽस्थुः॥१५

नटननिपुणशालभञ्जिकाभिर्विविधविलासवतीभिरभ्युपेतैः ।
सुरचितमणितोरणैः पुरस्तात् तदभिमुखाः ककुभो बभुश्चतस्रः ॥१६॥
चतसृषु च ककुप्सु वेदिकान्ताद् दशशतयोजनदीर्घतोच्छ्रितोऽधः ।
विविधमणिमयो ध्वजोऽमरैस्तैर्व्यधित चतुष्टयमात्रयेव धर्मः ॥१७॥
तदुपरि विलसत् सितातपत्रं चटुलितमौक्तिकजालकिङ्कणीकम् ।
अभवदिव नृलोकमुखीनं शिवपदमप्यधिनाथहार्दहूतम् ॥ १८ ॥
अहमहमिकयाऽथ भक्तिभाजो निजनिजनाथनियुक्तकाश्च शक्राः ।
द्व्यधिकदशविकल्पकल्पदेवा मणिरचिताङ्गणरक्षणं विचक्रुः ॥ १९ ॥
बहिरवततचेतनप्रदेशैः सहकृतमानसपुद्गलान् वितत्य ।
जगति तदवगाढपुद्गलौघं सुमणिमयं परिणामयाम्बभूवुः ॥ २० ॥
अविरलवलयाकृतीकृतोऽसौ सपदि च पञ्चधनुःशतोन्मितोच्चः ।
समुचितविपुलत्वसंयुतोऽभाद् रविपरिवेष इवाभि रत्नवेदिम् ॥२१॥
तदुपरि कपिशीर्षमालिका द्राक् पवित्रमणिभिर्विदधे तथैव चैभिः ।
अखिलमिदमकारि यत्क्षणेन द्युसतयस्तदहो महानुभावाः? ॥२२॥
अत उपरितनामरौघकृत्ये हितरतिनिर्वृत्तिहेतुतां प्रपन्ने ।
शशधरदिवसेशयोर्निदेशात् तदनुचरास्त्रिदशास्त्वरां प्रतीयुः ॥ २३ ॥
त्रिदिवसुरविकुर्वणानुकारी भगण उपाहितसूक्ष्मपुद्गलेषु ।
परिणतिमुपपादयाञ्चकार द्युतितहिरण्मयतां गतां क्षणेन ॥ २४ ॥
प्रथमवरणतो धनुःशतानि अधिकदशैत्य बहिस्ततान वप्रम् ।
परिमितिमधिकृत्य चोक्तपूर्वां पृथुलतयोच्चतया च भक्तिरक्तः ॥२५॥

युग्मम्,

मणिमयवरणाग्रमालयाऽसावतिशुशुभे परितोऽन्तरालभूमेः ।
अनु लवणसमुद्रमा वितर्दैः स हि जगतीवलयस्य साम्यमापत् ॥२६॥
दधदिह विबुधैः सहाभ्यसूयामसुरगणोऽथ गृहीतनायकाज्ञः ।
प्रथममुदितया सुपर्वशक्त्या रजततयाऽऽहृतपुद्गलांस्ततान ॥ २७ ॥
प्रगदितमितिभूमिकां विहायार्जुनवरणं वलितैः स तैर्विवेष्टे ।
उपरि परिणतैः सुवर्णसिद्ध्या व्यवगशिरोभिरलंचकार शालम् ॥२८॥
समुदितवरणत्रयं तदासीत् त्रयमिव गुप्तिनिबद्धमात्मनीमम् ।
भगवदभिहितोऽथवा शिवाध्वा त्रिकविधयेव मूर्ततामवाप्नोत् ॥२९॥
सुरपतिधनुषी नु मीलयित्वा कृतमिव कौतुकचारिणा मघोना ।
विविधवसुचितं दिदेव दीप्रद्युतिवरणत्रयमम्बरप्रतिष्ठम् ॥ ३० ॥
इह पुनरपि गुह्यकादिदेवा व्यदधत गोपुरतोरणानि सद्य ।

प्रतिदिशमधिरोहणाय पादस्थितिकरणानि सहस्रविंशतिं च ॥३१॥
अवसरयुपभुज्य तीर्थकृत्त्वं प्रविशति चात्मलयं सदैव यत्र ।
प्रतिसमयमघातिकर्मजालं विदलयति स्फुटवीर्यवानधीशः ॥ ३२ ॥
मणिमयतपनीयवप्रगर्भे गिरिशदिशामुपसृत्य चैत्यसालात् ।
तदमरगणभून्निषेवणीयं शुचितरमैश्वरमन्दिरं व्यकुर्वन् ॥ ३३ ॥ युग्मम्
पुनरपि पुरतोऽपि गोपुराणां दिशि दिशि हस्तिनखादधःस्थलीस्थाः।
समवसरणभूमिमारुरुक्षून् श्रमहरणात् त्वरयन्ति मानवान् याः ॥३४॥
विमलजलभृताः सुखावतारा विकसितवारिराजिराजमानाः ।
अनिलतरलिताभिराप्रतीरं जललहरीभिरिवाध्वगान् मिलन्त्यः ॥३५॥
कलरुतललिता मरालमाला विलसति यत्र सुघोषमेखलेव ।
तनुशुचिकरणानि पुष्करिण्यः शुचिभुवि निर्ममिरे वरामरैस्ताः ॥३६॥
त्रिभिर्विशेषकम् ,
सकलमपि निमेषमात्रमेव प्रभवति कर्तुमिदं यदेककोऽपि ।
तदिह सुरवराश्चतुर्निकाया युगपददो रचयन्तु किन्नु चित्रम् ॥३७॥
अपरसुरग्रहस्य चेदुदग्रां श्रियमृषयोऽपि हि वर्णयाम्बभूवुः ।
किमु सकलसुरासुरेश्वरार्च्याश्रयनिलयो न भवेदनुत्तरश्रीः ? ॥३८॥

इत्थं नाथागमनजनितामोदमत्ताः प्रसक्ताः
श्रीमद्भक्त्यां भवनपतयो व्यन्तराः खेचराश्च ।
कल्पावासाः पुनरजरसोऽनादिकृत्याभियुक्ताः
प्रीत्या चक्रुः समवसरणस्थापनां प्रेक्षणीयाम् ॥३९॥

इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये समवसरण—
वर्णनो नाम द्वितीयः सर्गः ।

---

## तृतीयः सर्गः ।

अथर्जुबालिकानदी तटस्थसालसालतः ।
विहर्तुमुद्यते विभौ ननाद देवदुन्दुभिः ॥ १ ॥
तकद्गभीरनिःस्वनो दिगन्तराणि चानशे ।
इवाज्यबिन्दुरेकतो गतो जलानि पल्वले ॥ २ ॥
यथा स्वशिष्यकान् गुरुः श्रुतं सहैव पाठयेत् ।
तथाऽपरान् सुरान् न कान् स घोषमन्वघोषयत् ॥ ३ ॥

तदा रसातलाधिगा मनुष्यलोकगा अपि ।
तदूर्ध्वगाश्च खेचरास्तथा विमानवासिनः ॥ ४ ॥
तदारवानुमानजाऽवधिप्रबोधबोधिताः ।
सुरा हि कोटिकोटयः प्रभुं प्रमाय दुद्रुवुः ॥ ५ ॥ युग्मम् ।
पुरा निपीय लोचनैर्महामहोभिरञ्चितम् ।
कृतप्रदक्षिणात्रया जगत्प्रभुं ववन्दिरे ॥ ६ ॥
नमो नमोऽस्तु ते प्रभो ! परात्मरूपधारिणे ।
नमो नमोऽस्तु ते प्रभो ! जगत्प्रकाशकारिणे ॥ ७ ॥
नमोऽस्त्वनन्तशक्तये जगज्जनोपकारिणे ।
अनन्तभावभास्वते नमोऽस्तु ते स्वयंभुवे ॥ ८ ॥
इति प्रणूय किन्नरा जिनेशभक्तितत्पराः ।
सुमन्द्रमध्यतारकैः स्वरैः पुरो यशो जगुः ॥ ९ ॥
सहस्रसङ्ख्यकैररैर्विनिर्मितं मणीमयम् ।
इवार्कमण्डलं नभोगतं स्फुरन्महाप्रभम् ॥ १० ॥
जयाय धर्मचक्रिणश्चचाल चक्रमग्रतः ।
तदीयरोचिषा निशा दिवस्वरूपमादधे ॥ ११ ॥ युग्मम् ।
ततोऽनुकूलमारुतेरितस्फुरत्पताकया ।
प्रभोः पथा चलन्तु भोयिति प्रणोदयन्निव ॥ १२ ॥
ध्वजोऽन्तरिक्षगोऽचलत् सहस्रयोजनोच्छ्रितः ।
सुरा हि यस्य वाहकाः कथं महिम्नि संशयः? ॥१३॥ युग्मम्
विचित्ररत्नमण्डितं ततो हिरण्मयासनम् ।
श्रमापनोदनक्षणे यदाश्रयेत तीर्थराट् ॥ १४ ॥
सपादपीठमम्बरे सुरासगं चचाल तत् ।
इवाध्वनि सुधाभुजामखण्डचन्द्रमण्डलम् ॥ १५ ॥ युग्मम् ।
तदुद्वहन्त ऐश्वरासनं सुरा यथाक्रमम् ।
परस्परार्थनापरा निजान् भुजानपीपवन् ॥ १६ ॥
प्रलम्बमानमौक्तिकावलीकलापमालितम् ।
इवेन्दुबिम्बमास्रवत्सुधासुबिन्दुसुन्दरम् ॥ १७ ॥
विजृम्भमाणमालतीविशालमालिकाचितम् ।
ध्वनद्द्विरेफझङ्कृतिप्रकाशितश्रि दूरतः ॥ १८ ॥
सुरत्नदण्डमण्डितं विहायसि प्रभासितम् ।
उपर्युपर्यधीश्वरं त्रिधाऽऽतपत्रमस्फुरत् ॥ १९ ॥ त्रिभिर्विशेषकम् ।

चतुर्दिशासु चामरावली ततोऽप्यनोदिता ।
उदच्छलत् सुराननोच्छलज्जयारवैः समम् ॥ २० ॥
अतो घनं मरुत्पथे विकुर्व्य मेघमालिनः ।
जलच्छटाभिरार्द्रयाम्बभूवुरध्वमेदिनी ॥ २१ ॥
दिशः प्रसादमासदन् निशाऽप्यभूद् महोज्वला ।
विमोचितेत्यनीतिभिर्धराऽप्युदश्वसीत् सुखम् ॥ २२ ॥
सुकृत्यपुष्पवार्दलान् नभस्तलाच्च विच्युतैः ।
सुगन्धिभिः सुमोत्करैः सुरा महीं प्रतस्तरुः ॥ २३ ॥
स्थिरा अपि द्रुमा जलाशयाः सुमैश्च शीकरैः ।
तदानुयायिवायुनोपचेरुरर्च्यमीश्वरम् ॥ २४ ॥
पुरःस्थिता अपि द्रुमाः प्रणम्य रम्यमार्गगाः ।
विनिद्रपुष्पसंहतीरभि प्रभुं डुढौकिरे ॥ २५ ॥
रविप्रभानुकारिणा खचारिचक्ररोचिषा ।
मृगाः प्रबोधिताः पथि प्रदक्षिणं प्रभोर्ययुः ॥ २६ ॥
तथैव वामपार्श्वतस्तरून् विहाय पतत्रिणः ।
विधाय तोरणाकृतिं गतेर्ययुः प्रदक्षिणम् ॥ २७ ॥
तवास्ति सिद्धिरित्यदो वचो बभूव पृष्ठतः ।
समेहि भो जयोऽस्ति ते पुरोऽपि गीरभूदिति ॥ २८ ॥
अनेकतूर्यनिःस्वनानुपातिकिन्नरस्वरैः ।
श्रवःसुखैकपात्रतामुवाह सर्वमम्बरम् ॥ २९ ॥
सुगन्धिनीरसंस्कृता ससौरभाऽप्यभूद् मही ।
जगत्पतेः समागतेरुपस्क्रियेत किं न हि ? ॥ ३० ॥
प्रति प्रभुं सुराङ्गनाऽवकीर्णमौक्तिकोत्करा: ।
नमन्नभश्चरोडुभिः सरूपतां प्रपेदिरे ॥ ३१ ॥
अधोगतानि कण्टकेष्वसितान्यतः प्रभृत्यहो ।
अधोमुखास्तकण्टकाः पथीत्यवीविदन्निव ॥ ३२ ॥
जिनेन हेमपद्मयोः क्रमौ निधाय गच्छता ।
महाद्रिसेनकाननस्थली सपद्यपूयत ॥ ३३ ॥
सुवर्णरत्नवप्रयोर्जिनालयेऽन्तरालगे ।
न्यधायि निर्जरैरधो निजांससंस्थमासनम् ॥ ३४ ॥
त्रिलोकनाथमन्दिरं तदा सुरासुरैर्वृतम् ।
रराज खेचरावलीप्रवेष्टिताद्रिराजवत ॥ ३५ ॥

अमण्डयंश्च ताण्डवं सुराः सुनृत्यपण्डिताः ।
जगुश्च केऽपि गायनाः प्रभोश्चरित्रमार्जने ॥ ३६ ॥
तथा श्रुतेषु विश्रुतान् गुणांश्च केऽपि तुष्टुवुः ।
सुराश्च केऽपि सादरं मुहुः प्रणेमुरीश्वरम् ॥ ३७ ॥
प्रणीय जानुसंमितां चितिं प्रसूनपाततः ।
विभूषितां वसुन्धरां व्यधुश्च केऽपि योजनम् ॥ ३८ ॥
महस्यमुत्र केचन स्वसुन्दरीभिरर्थिताः ।
प्रसादनाय चापरे स्वभर्तुरेव नाकिनः ॥ ३९ ॥
स्वमित्रनोदिताः परे परे स्वकीयभक्तितः ।
कुतूहलेन केऽपि च प्रमोदमाप्य चाययुः ॥ ४० ॥ युग्मम् ।
इत्थं महोत्सवमयीव महोज्ज्वलाभा
देवागमेन दिवसादपि दीप्यमाना ।
श्रीवर्धमानजिनराजविहारपूता
राज्यं प्रदाय दिवसाय निशा पपार ॥ ४१ ॥

इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये
भगवदागमनवर्णनो नाम तृतीयः सर्गः ।

---

## चतुर्थः सर्गः ।

अथोदियायारुणरोचिषाऽरुणः सरोजषण्डानि करैर्विकासयन् ।
दिवस्पृथिव्यावपि रोध्रमिश्रितैस्तथानुलिम्पन्निव यावकद्रवैः ॥ १ ॥
गजेन्द्रगत्या ततस्त्रिकालवित् सरन् नवस्वर्णसरोजपङ्क्तिषु ।
दधत् क्रमाम्भोजयुगं यथाक्रमं चचार चैत्यद्रुमसंमुखं प्रभुः ॥ २ ॥
अचेलतां बिभ्रदपि प्रभाभरैरुदारवासोभिरिवोपशोभितः ।
विनाऽप्यलङ्कारभरावधारणं विभूषणाढ्यस्य रमामिवोद्वहन् ॥ ३ ॥
सितातपत्रत्रितयाधरे चरन् विलोलवालव्यजनाभिवीजितः ।
समुत्थविश्वग्जयशङ्खसूचितः समागमद् रत्नचतुष्किकामिनः ॥ ४ ॥
युग्मम् ,
इमां समारुह्य सुरासुरेश्वरो दिशस्तु प्राच्याः प्रविवेश तोरणम् ।
ततः परिक्रम्य हरेर्दिगासने नमोऽस्तु तीर्थाय वदन्नुपाविशत् ॥ ५ ॥
असह्यतेजो न विषह्यते परैरतोऽस्य लोकैः सुलभं न दर्शनम् ।
इति प्रमायानिमिषैः प्रभोर्महोऽपवर्त्य भामण्डलमेकतः कृतम् ॥ ६ ॥

न्यधीयतास्यैव वराङ्गपृष्ठतस्ततोऽत्र नाथः प्रतिबिम्बपाततः ।
समस्तकाष्ठास्वपि संमुखं स्थितः समस्तसिंहासनगोऽप्यलक्ष्यत ॥७॥
युग्मम्,
तदा निनेदुर्दिवि तूर्यकोटयो जयध्वनिश्च प्रससार सर्वतः ।
इवाभिषिक्तो जगदीशतापदेऽधुनैव देवैरयमित्यदृश्यत ॥ ८ ॥
द्विजाश्रयोऽत्रावसरे नु गुर्वराभिधोऽभवत् संवसथस्तदन्तिके ।
इहावसद् गोतमगोत्रभास्करो द्विजातिरिन्द्रादिमभूतिराख्यया ॥ ९ ॥
शरन्निशानाथकरोत्करोज्ज्वलं यशो यदीयं विललास भूतले ।
अवाप पृथ्वीवसुभूतितस्तु यो जनिं नृरत्नं स कथं भवेन्नहि ? ॥१०॥
सुलक्षणं सर्वमपि स्वभावतः शरीरमेतस्य गुणानुवाच यत् ।
सुहृत्तयाऽनीक्षितलक्षणान्यपि व्यभावयन्नस्य गुणास्तदुज्ज्वलाः ॥११॥
पृथक् पृथग् वर्षधराचलाश्रयाः श्रुते श्रुताः श्रीप्रमुखास्तु देवताः ।
समैक्ष्यतात्रैव सुरीसमुच्चयः स्वलक्षणैरेषु तु तत्त्वदर्शिभिः ॥१२॥
अधीतपूर्वाः खलु सर्वसुकलाः स्मृता इवासन्निह यस्य जन्मनि ।
तदस्य शिक्षाश्रुतपाठको गुरुर्व्यजीगणत् स्वस्य गुरुत्वगौणताम् ॥१३॥
श्रुतेषु यत् सूत्रितमाद्यकोविदैः सदौचितं नीतिविचारचेष्टितम् ।
तथैव कल्पोऽस्य भवन् स्वभावतश्चकार कल्पागममात्मसाक्षिणम् ॥१४
पुरस्सरोऽसौ पदवाक्यवेदिनामभूत् शिशुत्वेऽपि ललन् स्वलीलया ।
ततो द्वयोर्गीर्पति-स्वर्गराजयोरयं तृतीयो भुवि पूज्यतापदे ॥ १५ ॥
सुनृत्यसंगीतकवित्वकर्मणां प्रसाधनीं छान्दसकर्मपद्धतिम् ।
अनन्यगम्यां यदसौ तथाऽन्ववेद् यथाधरोऽभूदपि पिङ्गलोरगः ॥१६॥
रवीन्दुताराग्रहधिष्ण्यचारतः प्रसाध्य कालत्रितीयं निमित्तवित् ।
समस्तलोकस्य शुभाशुभान्यसौ विवेद, किं दैवविदां रहःस्थितम् ?॥१७॥
न लौकिकालौकिकशब्दशक्तयः पदार्थबोधे प्रभवन्ति या विना ।
निरुक्तयस्ताः श्रुतपारदृश्वतां शशंसुरस्यैव सुधीसभोदरे ॥ १८ ॥
पपाठ वेदान् यदधीत्य पञ्चधा यथा सुरन्यासमुपाङ्गसङ्गिनः ।
ततोऽयमेवाध्वरकर्मकारिणामुवाह धौरेयपदं धरातले ॥ १९ ॥
यदृच्छयाऽऽक्षिप्तविधेः प्रमाणता प्रमाणमद्वैतमतेऽस्ति तत्त्वतः ।
इति श्रुतं श्रोत्रियताप्रकाशकं किमस्य मीमांसकतां न चावदत् ?॥२०॥
प्रमाणदृष्टान्तवितर्कलक्षणैः स्वपक्षसिद्धिः प्रतिपक्षखण्डनम् ।
यया प्रतन्येत तया हि विद्ययाऽसिधारयेवास्य जयो व्यजृम्भत ॥२१॥
स धर्मशास्त्राध्ययनं प्रभावयंश्चकार गृह्याश्रमधर्मसेवनम् ।

प्रशंसनीयस्तु स एव यः सदा दधाति वादे करणे च तुल्यताम् ॥२२॥
आरभ्य सर्गात् स रवीन्दुवंशगाः पुराणनिर्बद्धकथाश्चिरंतनीः ।
वदन् सुधास्यन्दसमानया गिरा बहुश्रुतत्वेन बभूव विश्रुतः ॥ २३ ।
अथैष यद्यप्यजुहोद् घृताशनं सुधाभुजः शश्वदियाज यद्यपि ।
तथापि सर्वामरतोषहेतुना ववाञ्छ यष्टुं त्रिदिवेच्छयात्मनः ॥२४॥
क्रियाविदोस्तत्सहजन्मनोर्द्वयोरमुष्य सादृश्यवतोः सतोरपि ।
ऋचां सदर्च्यानुभाषकान् द्विजान् समाजुहावैष जनैः प्रणोदितैः॥२५॥
समानभावा यशसा च विद्यया सु-वर्ण-संस्थान-वयःसदुक्तिभिः ।
स्वतोऽतिरिक्ता दश सूरिसिन्धुरा मिथः प्रणम्यासत तत्र मण्डपे ॥२६॥
प्रशस्तकाले दिन-लग्न-भ-ग्रहैर्भुवं विशोध्योचितमृत्तिकाऽऽचितम् ।
चतुष्प्रवेशं चतुरस्रचत्वरं व्यधापयंस्ते चतुरैर्यथाविधि ॥ २७ ॥
प्रसाध्य सूत्रैर्ध्रुवतो दिशः समा निखाय यूपं भुवि मध्यभागतः ।
समन्ततोऽस्याप्यमरावतीं पुरीं सुचित्रयाश्चक्रुरखण्डतन्दुलैः ॥२८॥
कुशासनस्थाः कुशपूतपाणयः श्रुतिप्रयोगे स्वरचारचारिणः ।
द्विजातिधुर्याः प्रतिकोष्ठकल्पितान् स्वनामवादेन सुरानतिष्ठिपन् ॥२९॥
ततः सदौवारिकदेवमण्डलं प्रदीप-धूपादिसपर्ययाऽऽर्यया ।
गृहाण पूजामिति पाठतत्परास्त्रिधा विशुद्ध्या क्रमतोऽमुमार्चिचन् ॥३०॥
अथाऽरणेर्मन्थसमुत्थपावकं प्रणीतमृक्पाठसखैरिषेत्विकैः ।
निनाय कुण्डं विधिवत् प्रकल्पितं हुताशदिश्येव स देवयाजकः ॥३१॥
हिरण्यरेता ववृधेऽनिलेरितः शमीसमिन्मिश्रपलाशतर्पणैः ।
मनोमताद् भोजनलाभतोऽपरं किमुच्यते पुद्गलपोषकारणम् ? ॥३२॥
अथो हवित्रीमुपसृत्य दम्पती प्रदक्षिणीकृत्य गृहीतविष्टरौ ।
धृतव्रतौ यष्टृमुखेरिता ऋचोऽनुभाषमाणौ प्रयतौ बभूवतुः ॥ ३३ ॥
सुरान् समुद्दिश्य हविर्ध्रुवाहितं समाहिताध्वर्युवरैरनूदितौ ।
शुचिस्रुचा संमुखपाण्युपात्तया धनञ्जयं भोजयतः स्म जम्पती ॥३४॥
गृहीतहव्यो ज्वलनस्तदा मखे दधौ महाज्वाल इतीव गौरवम् ।
अवाप्तभोगः खलु पूर्वरूपतो दधावपूर्वां वररूपसम्पदम् ॥ ३५ ॥
उपाददानो हविरुद्धतानलो धगद्धगेत्युत्थितशब्दसुन्दरः ।
प्रदक्षिणार्चिर्मुदमाश्वजीजनज् जनस्य तत्राहुतिमन्त्रवादिनः ॥ ३६ ॥
मुहुः सुरोद्देश्यकहव्यपाततः समुत्थधूमो गगनं समास्वजत् ।
सुपर्वणां तत्क्षणहूतिहेतवे प्रणोदितोऽध्वर्युभिरादरादिव ॥ ३७ ॥
इत्थं ज्योतिःष्टोमयज्ञं वितन्वन् स्वर्गावाप्त्यायिन्द्रभूतिर्विधिज्ञः ।

भागच्छन्ति स्वर्गमार्गात् सवेगं द्रङ्गस्योर्ध्वं देवयानान्यपश्यत् ॥३८॥

इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये
यज्ञवर्णनो नाम चतुर्थः सर्गः ।

---

## पञ्चमः सर्गः ।

आकस्मिको व्योमनि दिव्यनादो विचित्रवादित्रनिनादरम्यः ।
शब्दायमानानपि यायजूकानूर्ध्वावलोकप्रयतांश्चकार ॥ १ ॥
नभस्तलं पुष्कलमप्यमुष्माद् ग्रामादपापानगरीं च यावत् ।
सम्बाधमैक्षिष्ट महाविमानैश्चित्रीयमाणोऽत्र समस्तलोकः ॥ २ ॥
उद्ग्रीवमुत्प्रेषितचित्तनेत्राः सविस्मयाः संस्तरकारलोकाः ।
हविः स्रुचोपात्तमपि प्रदातुं हविर्भुजे न प्रभवो बभूवुः ॥ ३ ॥
सदैक एवोदयमेति सूर्यः श्रुतौ श्रुता वा द्व्यधिका दशैव ।
आः ! कोटिशोऽहर्पतयः कुतोऽमी संशेरते स्मेति जनास्तदानीम् ॥४॥
नित्यान्तरिक्षभ्रमिखेदखिन्नं ज्योतिष्कचक्रं भुवमापतेत् किम् ।
इत्थं मुहुः संशयशैलशृङ्गाऽऽरोहावरोहे जनताऽऽकुलाऽभूद् ॥ ५ ॥
दृश्येत गन्धर्वपुरं किमत्रोत्पादस्वरूपं श्रुतविश्रुतं वा ।
एवं वितर्कैर्बहुभिर्नृलोकः स्वास्थ्यं न लेभेऽद्भुत-भीतियोगाद् ॥ ६ ॥
इत्थं तथाऽस्वास्थ्यपथावतीर्णान् जनानवादीद् गुरुरिन्द्रभूतिः ।
कुतोरनालोच्य महाप्रभावमहो ! मुधा तर्कयतानृतं किम् ? ॥ ७ ॥
रम्योऽयमुत्तेजितरत्नभाभिर्विडम्बयञ्छक्रशरासनाभाम् ।
सहस्रपत्राकृतिरत्नपीठप्रतिष्ठितः स्तम्भसहस्रशोभी ॥ ८ ॥
सुजातजालाकलितः समन्तात् पञ्चालिकाविभ्रमलोभनीयः ।
चन्द्रोपलद्योतितचन्द्रशालः स्फुरत्पताकैः शिखरैः स्पृशन् खम् ॥९॥
प्रफुल्लसन्ध्याभ्रसमैर्वितानैर्नवच्छदिश्चित्रितचारुभित्तिः ।
प्रलम्बहाराञ्चितनागदन्तो मुक्तामणीजाललसद्वलीकः ॥ १० ॥
मृदङ्ग-वीणा-पणवारवाढ्यैर्घण्टानिनादैर्निभृतान्तरिक्षः ।
आयाति नो मन्त्रनिमन्त्रितो यद् दिवो भुवं देवविमानवारः ॥ ११ ॥

चतुर्भिः कलापकम्,

ध्यानैर्जपैर्वा बहुभिस्तपोभिः स्वप्नेऽपि यान् द्रष्टुमलं न मर्त्याः ।
तानद्य देवानिह सप्ततन्तौ प्रत्यक्षतः पश्यत नः प्रसादात् ॥ १२ ॥
ततः सुराणामिह याज्ञिका ! भोः स्तुतौ सपर्योपनतौ यतध्वम्

दुराप एषोऽवसरो नराणां क्व लभ्यते संगम ईश्वराणाम् ॥ १३ ॥
इत्युक्तवाक्येन गुरोः सहर्षास्तत्खण्डिकास्तुष्टुवुरेतमेव ।
भगो नमस्ते तव चैव शक्तेराकृष्टदेवा यदिहाभियन्ति ॥ १४ ॥
अश्रौष्म यन्मन्त्रमहाप्रभावाद् यागेषु देवागमनं पुराऽभूद् ।
तत् साम्प्रतं दर्शितमागमस्य प्रामाण्यमस्माद् गुरुणा त्वयैव ॥ १५ ॥
इत्थं वदत्स्वेव तदा द्विजेषु ग्रामं तमुल्लङ्घ्य कलम्बगत्या ।
ययुः सुराः सत्वरयानसंस्थाः, क्व वा विलम्बो महतां मुधा स्यात्?॥१६॥
निरीक्ष्य तानाशुगतिप्रवृत्तान् स्वच्छात्रवृन्दावृतगौतमस्य ।
हर्षस्मयौ शोकरुषावभूतां गते इव क्षौद्रघृते विषत्वम् ॥ १७ ॥
वैवर्ण्यमास्थाय तदेन्द्रभूतिः खिन्नो गतद्रव्य इवात्मवृत्त्या ।
निर्धारितार्थादितरत् किमेतत् प्रावर्ततेति स्वधिया निदध्यौ ॥ १८ ॥
जगाद चैवं जगदीश्वरीयं हन्ताज्ञतैव प्रतिभाति विश्वे ।
नो चेदिदं यागपदं विमुच्य भ्रान्ताः कथं हव्यभुजो भ्रमन्ति ? ॥१९॥
विज्ञातुमिच्छन्ति परोक्षमर्थं येभ्यो जनाः क्वापि हि सन्दिहानाः ।
प्रत्यक्षमप्यर्थमिमे विदुर्न ज्ञातं तदेषां विबुधाभिधानम् ॥ २० ॥
कैरप्यमर्त्यारिभिरुद्धतैर्वा प्रसह्य नीयन्त उतान्यतोऽमी ।
मेघाः समीरैरिव, विघ्नवन्ति श्रेयांसि शश्वत् खलु सम्भवन्ति॥२१॥
वृथाऽथवाऽनेन विमर्शनेन सृतं यतः प्रत्युत सप्रमोदाः ।
दृश्यन्त एते, खलु चित्तवृत्तिर्लक्ष्येत लिङ्गैरिह देहभाजाम् ॥ २२ ॥
तथाहि वीणाक्वणनं मृदङ्गध्वानस्तथा किन्नरगीतनादः ।
नृत्यत्सुरस्त्रीजननूपुराणां ध्वनिः कथङ्कारमृते प्रमोदात् ॥ २३ ॥
प्रभो ! चिरं जीव चिरं विधेहि त्रैलोक्यराज्यं जयतात् त्वमेव ।
आशिष्यते कोऽयमुदात्तगीर्भिर्मुहुः सुरैः सम्प्रति गीतिपूर्तौ ॥ २४ ॥
इति ब्रुवत्येव तदा द्विजेन्द्रे प्रादुर्बभूवेति वचोविकासः ।
अदृष्टपूर्वं किमहो अपापापुर्यन्तिके विस्मयकारि वृत्तम् ॥ २५ ॥
उपात्तवृत्तान्त इतो नियुक्तो वार्तायनोऽप्येवमुदाजहार ।
स्वामिन् ! प्रवृत्तामिह किंवदन्तीं सत्यामवेहि प्रणिधेहि चित्ते ॥२६॥
वप्रत्रयान्तर्मणिपीठिकायां सिंहासनेऽग्र्ये पुरुषः परात्मा ।
कोऽपि स्थितस्तत्प्रणिपातहेतोरायान्ति देवा हि विमानसंस्थाः॥२७॥
निर्धार्य तं नाहमवैमि मूढस्तथापि जाने जगदीश्वरोऽयम् ।
रूपेण देवैरपि दुर्लभेन ज्योतिर्भरेणापि खगातिगेन ॥ २८ ॥
श्रुत्वेति वाचं चरवक्त्रगर्भादाचार्यधुर्यो मनसा विमृश्य ।

विवेकिनो नीतिविचारदक्षानुवाच सत्रे समवेतसूरीन् ॥ २९ ॥
ब्रह्मा न विष्णुर्न हरोऽपि नो वाऽवधीरयेद्‌ यो मखभागमिष्टम् ।
कोऽसौ स्वमायां बहुलां वितत्य स्थितो जनानां बत वञ्चनाय ॥ ३० ॥
आः ! एष मायी कुहनैन्द्रजालक्रियापटुर्धर्मविलोपहेतुः ।
नो चेदिदानीमवधानहानिं कुर्यात् कथं सामगयाजकानाम् ॥ ३१ ॥
एतेषु च व्योमचरेषु कामं सत्यं सुरत्वं न वयं प्रतीमः ।
मायाविनां यद्‌ जनवञ्चकानां माया दुरन्तेति हि किं न विद्मः ?॥३२॥
मुग्धेषु लोकेषु कुतो विवेको ज्ञास्यन्ति हा हा प्रभुमेनमेव ।
किं ज्ञायते शासनमस्य कीदृक् सोपद्रवः सन्निगमो हि भूतः ॥ ३३ ॥
ध्वस्ते तु धर्मे जगतो गतिः का यत्नोऽस्य तत्कोऽपि विमर्शनीयः ।
क्रतुक्रिया तिष्ठतु तावदेतज्जयाभ्युपायो नियतो विधेयः ॥ ३४ ॥
विद्यावतामेष न दृष्टपूर्वो नापि श्रुतः क्वापि सुदूरदेशे ।
विहायसो वा पतितोऽत्र भूमौ किं वाऽवतीर्णो ननु भूमिगर्भात् ?॥३५॥
आयातु यात्वेष यतस्ततो वा स्वार्थं समाराधयतां सुखेन ।
दुःखाय नः किन्तु भवेत् प्रकामं लोकेऽस्य लोकेश्वरताप्रसिद्धिः॥३६॥
गर्जत्वयं तावदुदात्तघोषो गर्वं दधात्वीश्वरताभिषिक्तम् ।
यावन्न चास्मादृशदृष्टियोगं गतो गजो व्याघ्रमिवानवेक्ष्य ॥ ३७ ॥
शैलालिनां सिद्धिरुतेन्द्रजाले प्रस्तावसम्पादितवस्तुयोगाद्‌ ।
विद्यावतामत्र तु क्वापि नास्था मृषाविधौ न प्रतियन्ति बुद्ध्या ॥३८॥
वादाय नैव प्रभविष्णुरेषोऽस्माभिः समं निश्चितमेतदस्ति ।
नागाधिराजोऽपि विषं विमुञ्चन् किं वैनतेयेन समं समर्थः ? ॥३९॥
निर्जित्य तं यावदुपैमि गेहं विद्वद्वरैस्तावदिहासितव्यम् ।
पुरोग एवारिबलं जयेच्चेत् कृतं तदा पृष्ठगचक्रवीरैः ॥ ४० ॥
इति सरभसमुद्यन्माननागाधिरूढः शरमितशतशिष्यैर्वर्धितोत्साहसारः
समवसरणमैशं द्रष्टुमाश्चर्यहेतु भगवदभिमुखं द्रागिन्द्रभूतिः प्रतस्थे
इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये गौतमविषादो-
त्साहवर्णनो नाम पञ्चमः सर्गः ।

---

## षष्ठः सर्गः

प्रस्थितोऽथ वरगुर्वराह्वयाद्‌ ग्रामतो वनदिशं दृशौ क्षिपन् ।
गौतमो विबुधखण्डिकैर्वृतो दिव्यदैवरचनामुदैक्षत ॥ १ ॥

श्यामलच्छविविभासितं वनं तावदस्य नयने ऽयलोभयत् ।
पूर्वमेव महिमानमैश्वरं ज्ञापयत् कुमतमोहितानिव ॥ २ ॥
एतदेव महसेनकं वनं दृश्यते किमथवाऽत्र नन्दनम् ? ।
श्रीरमुष्य जनिताऽद्भुता कथं सन्निधाय स हृदीत्यचिन्तयत् ॥३॥
चित्रमेतदपरं विलोक्यते स्तम्भयोगमपहाय कारणम् ।
रत्नभूमिरियमुन्नता यतो ऽयोम्न्यहो ? गुरुतरा प्रतिष्ठिता ॥४॥
आरुरुक्षुरथ तां स उच्चकै रत्नबद्धरमणीयवर्त्मना ।
प्राङ् निरीक्ष्य जलपूर्णदीर्घिकां स्मेरपद्मसचिवां विसिष्मिये॥५॥
दीर्घकालमपि यावत् शिल्पिभिः शिल्पकल्पिता नेदृशी भवति ।
साऽधुनैव रचिता ततः स्फुटा देवताकृतिरियं प्रतीयते ॥ ६ ॥
सोऽथ मोक्षमिव गन्तुमुन्मुखो वप्रसम्मुखमितः समुद्ययौ ।
संमुखीकृतविशुद्धबोधतः प्राप्य शक्तिमिव चोर्ध्वगामिनीम् ॥ ७ ॥
वप्रगोपुरपुरःस्थतोरणं लम्बमानमणिहारभूषणम् ।
गन्धलुब्धमधुपावलीमिलत्पुष्पदामसुमशेखराञ्चितम् ॥ ८ ॥
लोचनातिथिमवाप्य लोभितस्तच्छ्रिया स मतिमत्र संदधे ।
पूर्वकल्पितविकल्पजल्पना मामिका विघटितेव भासते ॥ ९ ॥ युग्म
इन्द्रजालकुतुकं कृशाश्विनां दृष्टिसम्भ्रमकरं न चार्थकृत् ।
अर्थकृत्त्वमपरोक्षमत्र तु प्रेक्ष्यते किमपरं परीक्षितुम् ॥ १० ॥
राजती वरणभित्तिरीदृशी वीरुदुल्लिखितभक्तिभूषिता ।
मूर्ध्नि हैमकपिशीर्षमण्डिता देवकृत्यमतिरिच्य न क्वचित् ॥११॥
दर्शनीयमिह नास्ति यन्न तत् सर्वमेव किल चित्तहारकम् ।
निष्प्रयोजनविलम्बनं परं यत्र तत्र न मनस्विनो वरम् ॥ १२ ॥
स प्रविश्य विशिखां पुरस्ततः पश्यति स्म सुविमानमालिकाः ।
सद्वधूहृदयदेशशोभिता रत्नहारलतिका इवोज्ज्वलाः ॥ १३ ॥
यो गभीरजलवाहगर्जितं ह्रेपयन् प्रसरति स्म सर्वतः ।
श्रीजिनेन्द्रहृदयाननोद्गतः शुश्रुवे स मधुरो महाध्वनिः ॥ १४ ॥
यस्य कर्णसुखदः प्रवर्तते देवतूर्यनिनदोपरि ध्वनिः ।
स त्वचिन्त्यमहिमानुमीयते कोऽपि सम्प्रति विनापि दर्शनम् ॥१५॥
भानुभानुभिरुपैधितद्युतिर्भात्यहो कनकभित्तिरग्रतः ।
वप्र एष मणिशृङ्गसंगतः स्वर्णशैलसुषमामिवोद्वहन् ॥ १६ ॥
गोपुरं सुचिरं सतोरणं दीप्यमानमणिभाप्रभासितम् ।
शक्रचापकमलाऽपहारकं मन्मनो नयति पङ्गुतामिव ॥ १७ ॥

इन्द्रजालरचना विवद्यते चेदिहाप्यभिनिवेशमोहितैः ।
तर्हि सत्पथकथावधारणे सर्वमप्युदितमप्रमाणकम् ॥ १८ ॥
अस्तु मे गमनमग्रतः पुनश्चेतसेति विमृशन् द्विजोत्तमः ।
प्राविशत् कनकवप्रगोपुरं प्रेक्षणाय पुरुषोत्तमश्रियः ॥ १९ ॥
जानुदघ्नकुसुमोच्चयस्तृतां भूमिमुद्धुरसुगन्धसंभृताम् ।
तत्र सुन्दरतरां निरीक्ष्य स स्वर्गलोकसुखमन्वबोभवीत् ॥२०॥
तत्र वप्रवलये समन्ततोऽपश्यदद्भुतमतीव चक्षुषा ।
यद् विहाय कुलशत्रुतां मिथः संगताः स्थलचराश्च पक्षिणः ॥२१॥
ये विवेकविकला भयाकुलाः प्रायशो गिरिवनाधिवासिनः ।
तांस्तिरश्च इह शात्रवोज्झितान् भारती भगवतो व्यधात् किल॥२२॥
तद्ध्वनेर्मधुरिमातिमोहितं द्वीपिनं हरिणयूथमध्यगम् ।
व्याघ्रकण्ठमुपसृत्य संस्थिता मोहिता मृगमृगीर्ददर्श सः ॥२३॥
संवरोऽपि मृगराजसन्निधावुज्जहाविह तदुद्भवां भियम् ।
एष एव महिमा महात्मनः क्वापि येन न कुतः पराभवः ॥२४॥
सारमेयवृषदंशकं पुनः श्रोतुमीश्वरगिरः समाहितम् ।
मुक्तवैरमिव जातसौहृदं गौतमः स्थितमपश्यदेकतः ॥ २५ ॥
आलुलोकदपचापलं प्रभोर्भारतीश्रवणतः स वानरम् ।
मौनधारिणमिवार्यमानवं क्षामणापरमिवैडकाजकात् ॥ २६ ॥
सिंहपृष्ठिमुपधाय लम्बितग्रीवमत्र गवयः पिबन् गिरम् ।
निर्भयस्तनुमचालयन् निजां गौतमेन ददृशे मनःस्विना ॥ २७ ॥
बोधिदध्वनिविमोहितं शशं तस्य मित्रमिव चित्रकं स्थितम् ।
शान्तमेकमपरं च निर्भयं गौतमो दृगतिथिं विनिर्ममे ॥ २८ ॥
श्येन-गृध्र-शकुनिक्रमान्तरे रक्तलोचन-शुकादिपक्षिणः ।
सालभित्तिषु गिरोऽनुभावतो वीक्षते स्म स निराकुलोच्चलान् ॥२९॥
एतदद्भुतमुदीक्ष्य तद्गतं गौतमोऽथ विममर्श मानसे ।
योऽत्र कोऽपि पुरुषो महेश्वरस्तस्य चैष महिमावधार्यते ॥३०॥
शम्भुकोणविनिविष्टमार्हतं सद्म कल्पतरुमालिकावृतम् ।
चित्तमस्य हरति स्म किं मनोहारि नैव जगदीश्वरास्पदम् ?॥३१॥
रत्नवप्ररमणीयरोचिषो रागरञ्जितमिवाखिलं नभः ।
पश्यतो द्विजवरस्य धीरभूद्रागिणी जिनवरोपसर्पणे ॥ ३२ ॥
स प्रविश्य वरतोरणेन तं भास्वरं वरणगर्भमैक्षत ।
विश्वनाथमहसाभिपूरितं निर्मलाद्भिरिव संभृतं सरः ॥ ३३ ॥

दिक्चतुष्कनिगमागतामरैः पूर्यमाणमरुचत् तदङ्गणम् ।
सिन्धुनाथ इव वेगपातिभिः सर्वतः प्रसृतसिन्धुवारिभिः ॥३४॥
रत्नपीठमथ मध्यराजितं तुङ्गशृङ्गमिव मेरुसंगतम् ।
आरुरोह स विमोहमुद्वमन् ध्यानपद्धतिमिवास्थितो मुनिः ॥३५॥
आतपत्रमिव दण्डमण्डितं सत्प्रवालकुसुमैः करम्बितम् ।
छायया ऽत्र विनिवारितातपं स न्यभालयदशोकपादपम् ॥३६॥
तत्र मूलमनुकृत्य काञ्चने रोरुचन्मणिविचित्र आसने ।
गौतमोऽनुपमदीप्तिदीपितं वीक्ष्य नाथमपुनाद् निजे दृशौ ॥३७॥
अस्य विश्वपतिदर्शनासहाऽवाङ्मुखी यदभवन् मृषा मतिः ।
तद् बभूव सुमतिस्तु सम्मुखी कुत्र न प्रकृतिभेद ईक्ष्यते ॥३८॥
इत्थं यज्ञगृहे जनस्य पुरतो यां च प्रतिज्ञां दृढां
चक्रे तां तु पदे पदे शिथिलयन्नागत्य नाथान्तिके ।
तस्थौ तन्महसा जडीकृत इवाश्चर्योपभोगावशो
वाणीं भागवतीं पिबन् प्रमुमुदे विद्वत्तमो गौतमः ॥ ३९ ॥
इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये गौतमस्याद्भुतावेशवर्णनो नाम षष्ठः सर्गः ।

---

## सप्तमः सर्गः ।

अथ विज्ञाय भगवांस्ततस्तीर्थप्रवृत्तये ।
महसेनवनं क्षेत्रमपापायाः पुरोऽन्तिके ॥ १ ॥
पूर्वाह्णकाले वैशाखवलक्षैकादशीतिथेः ।
द्रव्यं च गौतमाभिख्यं भावं चरमदेहिताम् ॥ २ ॥
इन्द्रभूते ! त्वमायाहीत्यस्य नामोक्तिपूर्वकम् ।
वाक्येनालापयामास द्विजं मधुरया गिरा ॥३॥ त्रिभिर्विशेषकम्,
संस्तुतोऽपि चिरं लोको दुर्लक्षो जनसंकुले ।
मामेष कथमज्ञासीदित्यसौ प्रत्यचिन्तयत् ॥ ४ ॥
नामवेत्ता च लाकानां वेत्री वाऽत्र न दृश्यते ।
तदहो कथमज्ञासीद् नामवादेन मामयम् ॥ ५ ॥
गौतमेत्यभिधानं मे विदितं वर्तते जने ।
आहूयन्ते महान्तो हि प्रायो गोत्राभिधानतः ॥ ६ ॥
इन्द्रभूतीति मे नाम विरला बहुसंस्तुताः ।

विजानन्ति ततोऽयं तत् कथमाख्यात्यसंस्तुतः ॥७॥ द्वाभ्यां सम्बन्धः
शक्तं पदमपि स्वार्थं संकेतग्रहणं विना ।
नाभिधत्ते ततः कोऽत्र संकेतं ग्राहयेत् तु यः ॥ ८ ॥
प्रत्यक्षीकृतमैश्वर्यं प्रागेव गृहनिर्गमात् ।
सर्वज्ञताऽप्यनेनास्य वाक्येनाविरभूत् पुनः ॥ ९ ॥
किं वा स्वर्वासिसान्निध्यात् श्रियः पुंसो न दुर्लभाः ।
सर्वज्ञता तु दुष्प्रापा या परब्रह्मनिष्ठता ॥ १० ॥
सर्वज्ञताप्रतीतिर्वा न वाक्येनामुना भवेत् ।
नामानि तु समाख्याति पिशाचीसाधको यतः ॥ ११ ॥
वर्णचूडामणिग्रन्थाऽऽम्नाताऽपि च तथा वदेत् ।
स्वरशास्त्रप्रवीणोऽपि तथा तुम्बरुचक्रवित् ॥ १२ ॥
इत्येवं विमृशत्यस्मिन् भगवान् पुनरब्रवीत् ।
मयि सर्वज्ञतायां त्वं मा धाः गौतम ! संशयम् ॥ १३ ॥
यदहं संशयच्छेदी सर्वज्ञं मां प्रतीहि तत् ।
अन्यथाऽनुपपत्त्यैवार्थापत्तिमवधारय ॥ १४ ॥
त्वमापृच्छस्व वा मा वा वेद्मि ते संशयानपि ।
परस्परविरुद्धार्थवेदवाक्ये समुद्भवान् ॥ १५ ॥
अविरुद्धोऽपि मोहात् ते विरुद्धोऽर्थोऽवभासते ।
शङ्खो विरुद्धवर्णो यत् वीक्ष्यते तिमिरामयात् ॥ १६ ॥
तावदात्मनि सन्देहस्तव चेतसि वर्तते ।
जीवः किमस्ति वा नास्ति मुहुर्विमृशसीति यत् ॥ १७ ॥
प्रत्यक्षेण प्रमाणेन ग्रहीतुं नैष शक्यते ।
इन्द्रियग्राह्यताऽभावात् तस्माद् नास्ति खपुष्पवत् ॥ १८ ॥
कृशानोर्धूमवल्लिङ्गं किमप्यस्य न लभ्यते ।
यत्सम्बन्धेन जीवोऽयमदृष्टोऽप्यनुमीयते ॥ १९ ॥
अस्तु वा चेतना लिङ्गं सम्बन्धस्त्वनयाऽस्य च ।
प्रत्यक्षो नेक्षितः क्वापि प्राक्, ततः काऽनुमेयता ? ॥ २० ॥
धूमाग्न्योरपि सम्बन्धो गृहीतो हि महानसे ।
पश्चात् स्मरणतः शैले धूमोऽग्निं प्रतिपादयेत् ॥ २१ ॥
सामान्यतोऽपरत्रापि यद्वा व्याप्त्या गृहीतया ।
संसाधयेदनुमितिं क्वापि स्थानेऽनुमित्सिते ॥ २२ ॥
यथा स्थानान्तरप्राप्तिं पुंसो गत्यावलोक्य च ।

रवेर्देशान्तरप्राप्त्या गतिं लोकोऽनुमानयेत् ॥ २३ ॥
तथा सामान्यतो व्याप्तिं जीव-चैतन्ययोः पुरा ।
गृहीता केन, ? तस्माद् नाऽनुमानं त्वस्य साधकम् ॥२४॥
त्रिभिः सम्बन्धः,
स्यादागमोऽप्यदृष्टार्थविषयो ह्याप्तनिर्णयात् ।
प्रमाणं, कः स चात्राप्तः प्रत्यक्षं योऽमुमीक्षते ? ॥ २५ ॥
परस्परविरोधिन्यागमानामपि भारती ।
बृहस्पतिर्हि भूतातिरिक्तं जीवं न मन्यते ॥ २६ ॥
विज्ञानघन एवेति वेदवाक्याशयोऽप्ययम् ।
सम्भाव्यते तथाह्येष भू-जला-नल-वायुतः ॥ २७ ॥
विज्ञानघन उत्पद्य तान्येवानुविनश्यति ।
प्रेत्येति परलोकस्य काऽपि सञ्ज्ञा न लभ्यते ॥ २८ ॥ युग्मम्,
शून्यतामेव मन्वानाः सौगताः शून्यवादिनः ।
क्षणिकत्वात् सतोऽप्यन्ये बौद्धा जीवं न मन्वते ॥ २९ ॥
अस्तित्वमपि जीवस्य सम्भवेद् वेदवाक्यतः ।
तथाहि जुहुयादग्निहोत्रं स्वर्गस्य कामुकः ॥ ३० ॥
अशरीरं वसन्तं वा स्पृशतो न प्रियाप्रिये ।
प्रियाप्रियपरित्यागः सशरीरस्य नास्ति हि ॥ ३१ ॥
अकर्ता निर्गुणो भोक्ता चिद्रूपः पुरुषः स्मृतः ।
एवं विरुद्धार्थवादनिबद्धा आगमा यतः ॥ ३२ ॥
आत्मसादृश्यमाबिभ्रत् प्रत्यक्षं न हि वस्तु तत् ।
यस्योपमाप्रमाणेन साधनीयोऽसुमान् भवेत् ॥ ३३ ॥
उपपत्तिर्विनात्मानं न भवेत् यस्य किञ्च तत् ? ।
यद्बलात् साधयेदेनमर्थापत्त्या बुधो जनः ॥ ३४ ॥
एवं प्रमाणाविषयो जीवो भावोऽस्ति वा नवा ।
संशेषे मनसीति स्वे सर्वज्ञत्वात् तु वेद्म्यहम् ॥ ३५ ॥
श्रुत्वेति भगवद्वाचो गौतमोऽन्तश्चमत्कृतः ।
अहो सर्वज्ञ एषोऽस्तु दध्याविति विशुद्धधीः ॥ ३६ ॥
सन्दिग्धोऽर्थोऽप्रकाश्यो य आसीत् शल्य इवोरसि ।
प्रतिष्ठालोपभीतेन मयाऽऽख्यातो न कर्हिचित् ॥ ३७ ॥
यावद्विकल्पः सन्देहोऽवर्तिष्ट मम मानसे ।
तावद्विकल्पस्त्वधुनाऽमुनाऽयं प्रकटीकृतः ॥ ३८ ॥

उपांशु स्थितमेतस्माद् न हि किंचन विद्यते ।
ततः सर्वविदोऽस्माद् मे भवतात् तत्त्वनिर्णयः ॥ ३९ ॥
इति संकल्पयन्तं तं विज्ञाय पुरुषोत्तमः ।
आचष्ट पुनरप्येनं नयन्नुत्तरपक्षताम् ॥ ४० ॥
सुखदुःखे स्वसंवेद्ये प्रत्यक्षे भवतो यदि ।
शृणु गौतम ! सन्देहविज्ञानं किं तथा न हि ? ॥ ४१ ॥
विज्ञानमय एवं हि प्रत्यक्षो जीव इष्यते ।
प्रमाणान्तरसाध्यत्वमसत्यस्मिन् विचार्यते ॥ ४२ ॥
अहंप्रत्यय एकोऽपि क्रियां त्रैकालिकीं स्पृशन् ।
प्रत्यक्षो दृश्यते जीवं विनाऽहं प्रत्ययः कुतः ? ॥ ४३ ॥
शरीर एव चेदेषः प्रत्ययो गृह्यते तदा ।
तदवस्थे शरीरेऽपि मृतस्य न भवेत् कथम् ? ॥ ४४ ॥
उत्पादः संशयस्यापि न स्यात् संशयिनं विना ।
विज्ञानाख्यो गुणो ह्येष विहाय गुणिनं कुतः ? ॥ ४५ ॥
मूर्तत्वाद्वा जडत्वाद्वा देहोऽस्य न गुणी भवेत् ।
अमूर्तस्य गुणस्यानुरूपोऽमूर्त्तो गुणी यतः ॥ ४६ ॥
गुणी प्रत्यक्ष एव स्याद् गुणे प्रत्यक्षतां गते ।
रूपे गुणे हि प्रत्यक्षे प्रत्यक्षः स्याद् घटो गुणी ॥ ४७ ॥
शब्दे गुणे तु प्रत्यक्षे गुण्याकाशस्तथा न किम् ? ।
मैवं मंस्थाः, पौद्गलिकः शब्दो नाकाशगो गुणः ॥ ४८ ॥
प्रत्यक्षं मानसग्राह्यं विज्ञानादिगुणग्रहे ।
विशदप्रतिभासं यत् तद्धि प्रत्यक्षलक्षणम् ॥ ४९ ॥
यदि चाक्षुषमेव स्यात् प्रत्यक्षं किं तदोच्यते ।
गन्धादिविषये ज्ञानं प्रत्यक्षं निरूपाधिकम् ? ॥ ५० ॥
इत्यात्मा देशतस्तेऽपि प्रत्यक्षः सर्वथा मम ।
अस्खलज्ज्ञानयुक्तत्वाद् भवतः संशयो यथा ॥ ५१ ॥
अनुमानाद् गृहाणैवमन्यदेहेऽपि चिन्मयम् ।
जीवमस्तीति प्रवृत्तिनिवृत्तिभ्यां स्वरूपवत् ॥ ५२ ॥
अगृहीत्वाऽपि सम्बन्धं पूर्वं लिङ्गेन लिङ्गिनः ।
समं विधीयते चानुमानं लिङ्गेन तद्यथा ॥ ५३ ॥
यतो हसनै रोदनैर्भूतो गात्रेऽनुमीयते ।
अतोऽनैकान्तिकं पूर्वं सम्बन्धग्रहणं स्मृतम् ॥ ५४ ॥

आदिमन्नियताकारा जातौ यतस्तनुस्ततः ।
कुलाल इव कुम्भस्य तत्कर्ता कोऽपि कल्प्यताम् ॥ ५५ ॥
ईश्वरो निर्गुणो यो वा न स कर्तृत्वमर्हति ।
कृतकृत्यत्वसाचिव्याद् निर्विकल्पत्वतोऽपि वा ॥ ५६ ॥
ईश्वरः सगुणो यस्तु त्वदुक्त्या कर्तृतां गतः ।
नामान्तरेण तं जीवं विद्धि गोतम ! बुद्धितः ॥ ५७ ॥
दृष्टान्ते मूर्ततां वीक्ष्य दोषमात्मनि मा ग्रहीः ।
अदृष्टे देहसंयोगात् मूर्तत्वं तस्य निश्चितम् ॥ ५८ ॥
अदृष्टत्वेऽपि किं वायोर्मूर्त्तत्वं नाभिलक्ष्यते ? ।
इत्थं चानुमितिग्राह्यो जीवः सद्भावमश्नुते ॥ ५९ ॥
अक्षाणां परतन्त्रत्वात् करणत्वं विनिश्चितम् ।
ततोऽधिष्ठायकं सौम्य ! विना जीवं कमिच्छसि ? ॥ ६० ॥
संदंशवदुपादानमक्षग्रामं प्रतीहि भोः ।
कर्मारवदुपादाता विषयग्रहणेऽस्त्वयम् ॥ ६१ ॥
तनोः संघातरूपत्वात् स्वामी जीवोऽनुमीयते ।
भोग्यत्वाच्च शरीरस्य भोक्ता जीवोऽनुमीयते ॥ ६२ ॥
विहाय वस्तुनोऽस्तित्वं न स्यात् संशयसम्भवः ।
सतोर्हि स्थाणुपुंसोः स्यादरण्ये संशयोद्भवः ॥ ६३ ॥
सन्दिग्धं यच्च तत् तत्रान्यत्र वास्तीति निश्चयः ।
शशीयशृङ्गनास्तित्वेऽप्यन्यत्रास्ति तदेव सत् ॥ ६४ ॥
एवं संशयसद्भावादात्माऽस्तीति प्रतीयते ।
वन्ध्यापुत्रस्य नास्तित्वे संशयोऽपि न कस्य चित् ॥ ६५ ॥
इत्थमात्मानुमित्याऽपि साध्यतां गौतम ! त्वया ।
अथाऽविरुद्धवाक्यार्थं वेदस्यैवं विभावय ॥ ६६ ॥
विज्ञानमुपयोगोऽत्र ज्ञानदर्शनयोः स्मृतम् ।
तत्संघातो घनस्तेन विज्ञानघन उच्यते ॥ ६७ ॥
उत्पत्तिमत्वाद् भूतेभ्यो घटादिभ्यो यथायथम् ।
स जीवद्रव्यपर्यायः समुत्थायानुनश्यति ॥ ६८ ॥
ततः सञ्ज्ञापि न प्रेत्यापरसञ्ज्ञासमुद्भवात् ।
एवं हि देहिपर्यायोत्पत्तिनाशौ विवक्षितौ ॥ ६९ ॥
अशरीरं वसन्तं वेत्यादिवेदोक्तिभिः स्फुटम् ।
ध्रुवत्वं तस्य जीवस्य द्रव्यत्वेन प्रदर्शितम् ॥ ७० ॥ चतुर्भिः सम्बन्धः,

क्षणनश्वरताबुद्धिर्बौद्धानां या श्रुते श्रुता ।
ज्ञानपर्यायमाश्रित्य साऽस्तु द्रव्यानपेक्षणात् ॥ ७१ ॥
अनुमानात् स्वसाध्यं यः साधयन्नपि तं पुनः ।
खण्डयन्निह चार्वाकः सतां ग्राह्यवचाः स किम् ? ॥ ७२ ॥
शून्यतैव परं तत्त्वं येषां स्यात् शून्यवादिनाम् ।
तेषां वाच्योऽर्थशून्यत्वात् प्रतीताः स्युः कदापि न ॥ ७३ ॥
वेदान्तिमतिमाश्रित्य ब्रह्मैक्यं यद्यपि स्थितम् ।
तथापि लिङ्गभेदेनात्मभेदमवधारय ॥ ७४ ॥
उपयोगो हि लिङ्गं स्यात् तस्योत्कर्षापकर्षतः ।
भेदास्त्वनन्ता जीवानां भिन्नता तेन गृह्यताम् ॥ ७५ ॥
एषां वेदपदानां यत् तमर्थं वेत्सि नैव तत् ।
करोषि संशयं जीवे, सर्वेषामथवा ध्रुवम ॥ ७६ ॥
अर्थः किं वा भवेत् शब्दो जातिर्द्रव्यं गुणः क्रिया ।
विज्ञानं वस्तु भेदे वाऽयुक्तोऽयं संशयस्तव ॥ ७७ ॥
वस्तुधर्मो न युक्तो हि अयमेव न वेत्ययम् ।
सर्वं सर्वमयं चैव स्वान्यपर्यायतो यतः ॥ ७८ ॥
सर्वं विवक्षयाऽसर्वमयमप्यस्ति केवलम् ।
युक्तः पदार्थः सामान्यविशेषात्मा विवक्षया ।
वस्तुनो विश्वरूपो यत् पर्यायविवक्षया समः ॥ ७९ ॥
षट्पदीयम्, चतुर्भिः कलापकम् ।
प्रतीत्य मयि सार्वज्ञ्यं सत्यं मन्यस्व मद्वचः ।
रागद्वेषभयातीतो न ह्यसत्यं प्रभाषते ॥ ८० ॥
इत्थं संशयघातकानि वचनान्यापीय वीरप्रभोः
सर्वज्ञत्वमिहाधिगत्य जगतामीशत्वमालोक्य च ।
बाणैश्छात्रशतैरसौ परिवृतो मिथ्यात्वमोहोज्झित-
श्चारित्रं प्रविवेश सर्वविरतिं तीर्थाग्रणीर्गौतमः ॥ ८१ ॥

इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये गौतमस्य संशय-च्छेदानन्तरं प्रव्रज्याग्रहणवर्णनो नाम सप्तमः सर्गः ।

# अष्टमः सर्गः ।

इन्द्रभूतिमथ सोदरमग्र्यं दीक्षितं जिनपदेन निशम्य ।
अग्निभूतिरपि तल्लघुबन्धुर्भग्नबाहुरिव खेदमवाप ॥ १ ॥
यं बृहस्पतिरपि श्रुतिवादे जेतुमर्हति न युक्तिपृषत्कैः ।
सोऽपि केनचिदहो ? निगृहीतो हन्त ! दैवरचितं हि दुरन्तम् ॥ २ ॥
भ्रातरं मम महान्तमजैषीत् यश्छलादिनिपुणः स च वादी ।
तत्र यत् किमपि सम्प्रति वृत्तं ज्ञायते न निखिलं तदगत्वा ॥ ३ ॥
यज्ञपाटकमतीत्य सुरा यत् निर्ययुस्तदभवद् विपरीतम् ।
मत्सहोदरपराजय एवं कोऽद्य दैवविषमो बत कालः ॥ ४ ॥
कोऽस्त्यसौ सुरवरैरपि सेव्यो यस्य चैष महिमा वरिवर्त्ति ।
दर्शनेऽस्य विहिते खलु पश्चात् तच्च मे भवतु यद् भवितव्यम् ॥ ५ ॥
निर्ययावयमपीति विमृश्य च्छात्रपञ्चशततन्त्रसमेतः ।
इन्द्रभूतिरिव विस्मयमृच्छन्नाप तीर्थपतिदर्शनदेशम् ॥ ६ ॥
एहि सूरिवर ! पावकभूते ! भ्रातृवत् त्वमपि संशयमुज्झ ।
तत्र तीर्थपतिनेति स उक्तो विस्मयं मनसि बाढमुवाह ॥ ७ ॥
अग्निभूतिरपि वाक्यविचारे प्राविशद् ध्रुवमसौ सकलज्ञः ।
अन्यथा परमनोगतमेवं कः प्रकाशयति गूढविमर्शम् ? ॥ ८ ॥
वेत्ति यः परमनोविचिकित्सां निर्णयोऽपि हि भवेत् तदधीनः ।
तं च वक्ष्यति ततोऽयमपृष्टो मौनमेव मम साम्प्रतमस्तु ॥ ९ ॥
सर्ववित् समधिगम्य तदीयं चित्तभावमथ वाचमवोचत् ।
सौम्य ! वेत्सि विषयः करणानां कर्म नो तदिदमस्ति नवेति ॥ १० ॥
यत् तवाप्रकटमस्ति तदेतत् वर्तते प्रकटमेव ममात्र ।
केनचिच्छरभसिंहगजाश्चेन्नेक्षिताः किमु न ते खलु सन्ति ? ॥ ११ ॥
कर्मसाधनमदोऽप्यनुमानं विद्यते तदवधारय बुद्धौ ।
प्राणिनामिह फले सुखदुःखे कारणं यदिह तत् किल कर्म ॥ १२ ॥
दृष्टमेव रमणीपरिभोगाद्यं सुखस्य च विषाद्यसुखस्य ।
कारणं यदि भवान् मनुते किं तत्फले विषमताऽस्ति तथाहि ॥ १३ ॥
यद्रुगादि वनितापरिभोगे रोगहानिरपि वा विषभोगे ।
दृश्यते बहुतरं तददृष्टं कारणं किमपि कल्पयितव्यम् ॥ १४ ॥
साधनेष्विह समेषु विशेषो यः फलेऽस्ति स च कारणयोगात् ।
गौरबन्धुषु समेषु य एकः श्यामलः स विषमाशनहेतोः ॥ १५ ॥

दृष्टहेतुकलने व्यभिचारं वीक्ष्य कल्पय तदेवमदृष्टम्।
तच्छरीरमिह कार्मणसंज्ञं यद्भवान्तरविधानसहायम्॥ १६ ॥
यद्विनाऽन्यतनुसम्भव एव स्यान्न गौतम! विचारय चित्ते।
मूर्तमन्तरपहाय नु मूर्त्तं वस्तु केन सह गच्छति योगम्?॥ १७ ॥
या च का च न सचेतनक्लृप्ता सा क्रिया फलवती न हता चेत्।
तच्छुभाशुभकृतेः फलमेतत् कर्म सिद्ध्यति कृषेरिव धान्यम्॥१८॥
तत् क्रियामुदयजामधिकुर्वत् साधयेत् खलु फले सुख-दुःखे।
एवमेव सकलाऽपि फलार्था स्यात् क्रिया तदिह सिद्ध्यति कर्म॥१९॥
कीर्तिलाभफलमस्त्यथ दाने मांसभोजनफलं पशुघाते।
धान्यवद् भवतु दृष्टफलैव सा क्रिया कथमदृष्टविकल्पः?॥ २० ॥
मा ग्रहीर्द्विजवरेति विवादं यत्तु दृष्टमिह तच्च विनष्टम्।
स्यान्नवाटनमहो? वद कस्माच् चेद् न हीच्छसि फलं तददृष्टम्॥२१॥
सा क्रिया फलतु यत्फललिप्सा मा परेति सफलाः सकलाः किम्?।
नैवमिच्छति न बन्धनस्य तु बाधां चौर्यकृत् किमु लभेत तत्?॥२२॥
सत्क्रियाकरणमस्ति सदाऽल्पं दृश्यते हि बहुलं विपरीतम्।
यत्र वा सकलकारणयोगोऽनिच्छतोऽपि खलु सा फलदा स्यात्॥२३॥
कर्म सिद्ध्यतु परं तददृष्टं मूर्त्तमित्यविमलं प्रतिभाति।
मा विधेहि मनसीति विमर्शो भूय एव विपुलां शृणु युक्तिम्॥ २४ ॥
वेद्यते सुखमथाप्यसुखं वा भोजनादिदहनाद्यनुषङ्गात्।
मूर्त्ततात्र यदि कर्मणि सापि प्रस्फुटा तनुतया न हि दृष्टा॥ २५ ॥
यद् यदात्मगुणधर्मविभेदे बाह्यवस्तुबलतो बलधारि।
तत् तदार्य! परिभावय मूर्तं पश्य कुम्भमपि तैल-घृताक्तम्॥ २६ ॥
यद् यदात्मगुण धर्मविभेदे भिन्नभिन्नपरिणाममवाप्तम्।
तत् तदाऽऽर्य! परिभावय मूर्तं क्षीरमाश्रय निदर्शनमत्र॥ २७ ॥
योग्यतापरिणतं खलु मूर्तं दृश्यतेऽपरमदृश्यमवेहि।
ज्ञातमत्र पवनद्व्यणुकादि स्पष्टमेवमिह भावय कर्म॥ २८ ॥
इत्थमात्महृदि संशयभङ्गे सर्ववेदिनमिनं प्रतिपद्य।
खण्डिकैः सह शिवोचितमार्गे सोऽग्निभूतिरपि दीक्षित आसीत्॥२९॥
वायुभूतिरथ तल्लघुबन्धुर्भ्रातृयुग्ममपि दीक्षितमेवम्।
मुक्तचारवचनादधिगत्य स्वे मनस्यपि भृशं विममर्श॥ ३० ॥
गन्धहस्त्युपमयोपमितौ यौ तावुभावपि बुधौ मम बन्धू।
यं गुरुं विनयतः प्रतिपन्नौ श्रेयसेभवतु मे स उपास्यः॥ ३१ ॥

मन्मनोमलविशोधनमद्योपेत्य तं जिनपतिं विदधामि ।
चिन्तयन्निति स नाथसमीपे पञ्चखण्डिकशतैः सहितोऽगात् ॥३२॥
आजुहाव विभुरप्यमुमेवं किं ब्रवीषि न समीरणभूते ! ।
यां श्रुताध्ययनतो विचिकित्सामादधासि तनुजीवविभेदे ? ॥ ३३ ॥
यत् सुराङ्गसमवायसमुत्था क्षीबता न परतोऽञ्चति तद्वत् ।
चेतना क्षिति-जलाऽनल-वायु-व्यूहजेयमिति चेतसि वेत्सि ॥ ३४ ॥
स्वर्गकामुकजनस्तु यजेतेत्यादिवाचि तनु-जीवविवेकः ।
बोध्यते पुनरतः सदसत् किं ? स्वास्थ्यमत्र लभसे न मुधैव ॥ ३५ ॥
या च शक्तिरसती प्रतिवस्तु सा कुतः समुदये समुदेति ?, ।
चेदिदं नः सिकतासमवाये किं न तैलजननं जगतीष्टम् ? ॥ ३६ ॥
शक्तिरन्ववयवं मदिराया अस्ति चेत् समुदिता प्रबला स्यात्, ।
चेन्न; तर्ह्यनियतं मदिराङ्गं योज्यते न किमु मादसुखाप्त्यै ? ॥ ३७ ॥
मात्रया क्षितिजलादिषु विष्वक् चेतनाऽस्तु सकला समवाये ।
मा ग्रहीरिति मतिं, मृतदेहे लेशतोऽपि लभसे न कथं ताम् ? ॥३८॥
वायु-वह्निविकले मृतदेहे सा न चास्ति मतिमित्यपि मा धाः ।
श्रोत्रतो नलिकया नय पूर्तिं तत्र तौ यदि भवेद् भवदिष्टम् ॥ ३९ ॥
चेद् विशिष्टपवनानलयोगो नास्ति तत्र, नु कुतो न विशिष्टौ ?, ।
कारणादपि कुतो यदि तत्, किं देहवर्तिनमुपैषि न जीवम् ? ॥ ४० ॥
भौतिकेन्द्रियविभावितमर्थं कः स्मरेद् यदि भवेद् न हि जीवः ? ।
किं गवाक्षविवरैरनुभूतं संस्मरेद् गृहमथो पुरुषो वा ? ॥ ४१ ॥
मन्दिरे क्वचन पञ्चगवाक्षे भिन्नभिन्नकृतिकारकमेकम् ।
चेत् प्रपश्यसि नरं गृहनाथमेवमात्मनि तनावपि पश्य ॥ ४२ ॥
यश्च धित्सति पयः शिशुरादौ क्वापि तत् प्रथमवृत्तित एव ।
जीवमेनमवगच्छ ततस्त्वं देहभिन्नमपरापरदेहम् ॥ ४३ ॥
एवमेव सुखदुःखभयादेर्वेदकः स च परम्परयाऽर्भः ।
चेतना तव मता तनुजा चेदादितः कथमसौ व्यवहारः ? ॥ ४४ ॥
चेत् स्वभावमवलम्ब्य न मुञ्चेराग्रहं वद तदा स च कीदृक् ? ।
चिन्मयोऽयमिति चेन्न जडेनान्वेति भूतनिवहेन चिदात्मा ॥४५॥
अस्ति स प्रकट एव तदात्मा भेदवांश्च मनसोऽप्युपयोगी ।
व्यापृतिं जगति यस्य विमुच्य ज्ञानकार्यमखिलं निहतं स्यात् ॥४६॥

इति हृदि कुविकल्पव्याधिबाधावियुक्तो
भगवति जिननाथे सर्ववित्त्वं प्रतीत्य ।

सपदि सपरिबर्हस्त्रीणि रत्नानि गृह्णन्
शिवपदपथपान्थोऽभूद् द्विजो वायुभूतिः ॥ ४७ ॥

इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये गौतमलघु-
द्वयदीक्षाग्रहणवर्णनो नामाष्टमः सर्गः ।

---

# नवमः सर्गः ।

व्यक्ताभिधानोऽथ विशारदानां सदस्युपाध्यायपदप्रतिष्ठः ।
भ्रातृत्रयं प्रव्रजितं निशम्य श्रीवीरनाथं प्रणिनंसुरासीत् ॥ १ ॥
समाजगाम स्वपरिच्छदेन च्छद्म व्यतीत्याशु जिनोपकण्ठम् ।
व्यक्ताभ्युपेहीति जिनोऽभ्यवादीद् विमुञ्च भूतेषु च नास्तिभावम् ॥२॥
स्वप्नोपमं वै जगदिन्द्रजालोपमं विचार्येति वचो विचारम् ।
भूतानि लुम्पस्यथवा व्यपेक्षामाश्रित्य सर्वं ननु वेत्सि शून्यम् ॥ ३ ॥
तथाह्यकुम्भव्यतिरिक्तकुम्भेऽन्योन्याश्रयापेक्षणमस्ति यस्मात् ।
सिद्धिः स्वतो वस्तुन एव नास्ति प्रतीयते तेन नु शून्यतैव ॥ ४ ॥
यः कश्चिदर्थः स च कार्यरूपः स्यात् कारणं वा व्यवहारतोऽत्र ।
परस्परापेक्षितयाऽनयोर्यत् स्वतोऽपि सिद्धिः परतोऽपि नैवम् ॥ ५ ॥
सूक्ष्मत्वतो वस्तुनि नाभिगम्यौ वाऽऽद्यन्तभागौ परमाणुरूपौ ।
लभ्यं कथं वा तदधीनमध्यं तस्मात् तवाऽऽस्था ननु शून्यतायाम् ॥६॥
व्यक्तोत्तरं तत्र गृहाण पक्षं स्वप्नेन्द्रजालोपमितं जगद् यत् ।
आख्यातमेतत् तु विरागतायै मोहस्य हान्यै तदनित्यतातः ॥ ७ ॥
यच्चर्चितं दृष्टमथानुभूतं श्रुतं च तत् स्वप्नगतं सदेव ।
प्रबोधिनश्चेत् तदसत् तथापि स्थिता परत्रैव तदर्थसत्ता ॥ ८ ॥
यद्यप्यसत् प्रस्तुतमिन्द्रजालं तथाऽप्यसन्तो न तदीयभावाः ।
तथा जगज्जालविशालगर्भे भूतानि सन्त्येव न काऽपि शङ्का ॥ ९ ॥
स्वप्नेन्द्रजाले अपि भावरूपे कुतोऽन्यथाऽस्य तदभावयुक्तिः ।
अस्वप्न इत्येवमनिन्द्रजालमिति प्रतीतिर्यत ऊहनीया ॥ १० ॥
सद्वस्तुनि स्यादथ संशयोऽपि यत् स्थाणुपुंसोः स्फुट एव दृश्यः ।
तद्भूतसन्देहविशेष एव प्रस्फारयत्यत्र तदर्थसत्ताम् ॥ ११ ॥
अपेक्ष्य भावं परमार्थसत्तां त्वं मन्यसे तन्न सहेत युक्तिम् ।
ह्रस्वं च दीर्घं च समं च वस्तु स्वसत्तयाऽपि प्रतिभासमेति ॥ १२ ॥

ह्रस्वत्व-दीर्घत्व-समत्वधर्मा यद्यप्यपेक्षावशगा भवन्ति ।
तथापि वस्त्वेतदिति स्वसत्तामालम्बमानं प्रति धर्मभानम् ॥ १३ ॥
पुत्रत्व-पौत्रत्व-पितृत्वधर्मा यद्यप्यपेक्षावशगास्तथापि ।
सन्तो हि सत्त्वेन भवन्ति पुंसस्तथाच भावाः स्वत एव सिद्धाः ॥१४॥
सम्बन्धमासाद्य कमप्यपेक्षां प्रयान्ति कांचित् परभावतश्चेत् ।
तथापि कार्यादिसमस्तभावाः स्वस्यैव सत्तामधिकृत्य सन्तः ॥१५॥
तथादिमध्यान्तविभागयुक्तिः पुंसो विवक्षावशगोपदिष्टा ।
तत् सौम्य ! मागाः स्वपरप्रणाशं यतः समृद्धं जगदस्ति सर्वम् ॥१६॥
निशम्य युक्तिमिति वीरवक्त्राद् विहाय मोहं समशून्यतायाः ।
व्यक्तः समं पञ्चशतैः स्वशिष्यैः पथि प्रवव्राज जिनाधिपोक्ते ॥ १७ ॥
यत्संशयच्छिज्जगदेकनाथः श्रीवर्धमानोऽवततार विश्वे ।
श्रुत्वेति मेधाविवरः सुधर्मा समुत्सुकोऽभूज् जिनदर्शनाय ॥ १८ ॥
छात्रैः समं पञ्चशतैः प्रणन्दन्नागत्य तस्थौ जिनसम्मुखः सः ।
कृपालुरप्याह मुधा सुधर्मन् ! मोहं प्रयासीति समं सदृक्षम् ॥ १९ ॥
सदृक्षता कारण-कार्ययोर्यद् यवो विशीर्य्याऽपि यवं प्रसूते ।
तथा मनुष्यो हि भवेत् मनुष्यो नारी तु नारीति पुमान् पुमांश्च ॥२०॥
गीयेत वेदे च शरीरभाजां समस्तयोनिग्रहणं समेषाम् ।
सन्देहमुत्पादयतीति वाक्यं शृण्वग्निवैशायन ! तत्समाधिम् ॥ २१ ॥
यत् कारणेनानुगुणं हि कार्यं नैकान्तिकं तत् परिभावनीयम् ।
नो चेत्, तदा किं तपनीयसिद्धिः केनापि योगेन भवेदयस्तः ? ॥२२॥
चेदाग्रहः कारणकार्यसाम्ये तथापि योनिभ्रमणं सुसिद्धम् ।
यत् कारणं कर्म विचित्ररूपं विचित्रयोनिरपि किं न कुर्याद् ? ॥२३॥
प्राक् कर्मसिद्धिः प्रतिपादितैव या च क्रिया सा फलशालिनीति ।
ततोऽर्जितं कर्म विचित्ररूपं विचित्रयोनिप्रतिपत्तयेऽस्तु ॥ २४ ॥
नाट्ये यथैको भरतो विचित्रान् गृह्णाति वेषानसुमांस्तथैव ।
ततः सुधर्मन् ! परिहृत्य मोहं मन्यस्व सर्वत्र विचित्रभावम् ॥ २५ ॥
ततः सुधर्माऽपि बुधः प्रबुद्धो दीक्षां ललौ पञ्चशतैः स्वशिष्यैः ।
अथागतो मण्डितसूरिराजस्सार्धैस्त्रिभिश्छात्रशतैः समेतः ॥ २६ ॥
आगच्छ भोः ! पण्डित ! मण्डित ! त्वं स्वामीति संभाष्य पुनस्तमाख्यत् ।
जीवस्य किं कर्मभिरस्ति बन्धो मोक्षश्च वा नेति जहाहि मोहम् ॥२७॥
बद्धो हि जीवो विवशोऽत्र विश्वे नानागतीर्याति पुनर्न मुक्तः ।
बद्धो न चायं विगुणो न मुक्तो वेदोक्तिभिर्वेति वृथासि शङ्काम् ॥२८॥

स्यात् सादिबन्धे सति चेतनादेर्निर्हेतुकत्वाद् न हि सम्भवोऽपि ।
अनादिबन्धे तु भवेद् न मोक्षो युक्तीरिति स्फोरयसे वृथा त्वम् ॥२९॥
गृहाण सौम्योत्तरमेतदत्र परस्परं कारणकार्यभावात् ।
अनादिसन्तानमवेहि कर्माङ्गयोस्तु बीजाङ्कुरवद् मनीषिन् ! ॥ ३० ॥
अनादितो मृन्मिलितं सुवर्णं यथा वियुज्येत कृताभ्युपायात् ।
अनादिबद्धो घनकर्मजालैः ज्ञानक्रियाभ्यां हि तथाऽयमात्मा ॥ ३१ ॥
अनादिमिथ्यात्वकषाययोगाव्रतप्रमादाभिधहेतुसङ्गात् ।
अज्ञानभावेन यतः प्रवृत्तिं जीवस्य वित्तात् त्वमनादितोऽपि ॥३२॥
अनादिकर्माणि तदाश्रयाणि तत्संततोत्पत्तिरनादिरेवम् ।
अज्ञानयोगात् सगुणोऽयमात्मा स्वकर्मबद्धव्यपदेशमेति ॥ ३३ ॥
पिता स पुत्रश्च पिता स पुत्रः सम्बन्ध एष क्व विराममेति ।
तथा निमित्तं हि तदेव कर्मान्वयोऽप्ययं शृङ्खलयास्त्यनादिः ॥ ३४ ॥
अरूपिणि व्योमनि चेद् निबन्धं घटादिकानामुत मन्यसे त्वम् ।
तत् कर्मणः पौद्गलिकस्य बन्धं किं शङ्कसेऽनादि विमूढजीवे ? ॥ ३५ ॥
ज्ञात्वा पुनः स्वं च परं परेभ्यो निवर्तमानो विलसन् स्वभावे ।
निःशेषशुद्धोऽक्रियतां प्रपन्नो मुक्तो निगद्येत सदा चिदात्मा ॥ ३६ ॥
यद् निर्गुणो नैव कदापि बद्धो व्याख्यायि वृद्धैरिह चिन्मयोऽयम् ।
तद् निश्चयाध्वानमपेत्य लक्ष्यं चैतन्य-जाड्योभयभावभेदात् ॥३७॥
निशम्य युक्तीरिति वीतशङ्कः श्रीवीतरागोक्तगभीरवाचाम् ।
स मण्डितोऽपि स्वपरिच्छदेन सावद्यकृत्याद् विरतो बभूव ॥ ३८ ॥
सार्वज्ञ्यमाकर्ण्य जिनेश्वरस्य श्रीमण्डितं प्रव्रजितं च बुद्ध्वा ।
समाययौ मौर्यबुधः सतन्त्रः शिवाध्वचारोत्सुकचित्तवृत्तिः ॥ ३९ ॥
भो मौर्यपुत्रामरलोकवार्ता सती नवा संशयवानिति त्वम् ।
मायोपमान् पश्यति निर्जरान् को व्यामोहयदित्यपि वेदवाक्यम् ॥४०॥
त्वमूहसे नैरयिका यदार्ता आवृत्तिमृच्छन्ति न दुःखदिग्धाः ।
स्वायत्ततायामपि यत् सुराणां नावृत्तिरीक्ष्येत ततो वितर्कः ॥ ४१ ॥
स्युर्यज्ञकर्माणि सुराश्रयाणि प्रतीयते तेन तु देवसत्ता ।
विरुद्धवाचस्तव चित्तमेवं विधूनयन्त्यस्तकिनास्तिभावात् ॥ ४२ ॥
प्रत्यक्षतः पश्य मनोज्ञवेषान् देवानिमानत्र चतुर्निकायान् ।
जानीहि मा केचिदिमे मनुष्याः सन्तीति पश्यानिमिषत्वमेषु ॥ ४३ ॥
ज्योतिष्कचक्रं विचरन्तमभ्रे प्रत्यक्षतः पश्यसि किं न सूरे !
जानीहि मा किंचिदिदं प्रमेयं तेजोमयं वाऽम्मयमेव वास्ति ॥ ४४ ॥

तस्वे जडत्वाद् गतिरीक्ष्यते किं ? सचेतनत्वे खलु युज्यते सा ।
तथात्र चेदालयमात्रबुद्धिस्तथापि ये वासभृतः सुरास्ते ॥ ४५ ॥
रतिर्गतावेव सदाऽप्यमीषां चिरंतनी वा स्थितिरस्ति लोके ।
यल्लोकपालानुमताः सुराद्रिं प्रदक्षिणीकृत्य परिभ्रमन्ति ॥ ४६ ॥
तथा सुरा व्यन्तरका मनुष्यान् सुखानि दुःखानि च लम्भयन्तः ।
सन्ति प्रसिद्धास्तदहश्यता तु प्रतीयतां वैक्रियकाययोगात् ॥ ४७ ॥
स्थूलं च सूक्ष्मं च लघु प्रलम्बं दृश्यं तथाऽदृश्यमपि प्रकाशम् ।
देहं यदृच्छानुगतं सुराणां यद् वैक्रियं स्याद् विविधक्रियातः ॥ ४८ ॥
अत्युग्रपापद्रुफलोपभोगः ख्यातो यथा नैरयिकेषु सद्भिः ।
तथा महापुण्यफलोपभुक्तौ देवा निरुक्ताः खलु तारतम्यात् ॥ ४९ ॥
मायोपमत्वं यदवादि वेदे ह्यनित्यतायाः प्रतिपादकं तत् ।
न चेदिदं यज्ञविधिस्तु सत्यो भवेत् कमुद्दिश्य मनोरथाप्त्यै ॥ ५० ॥

इति श्रुत्वा युक्तीर्जिनपतिसुधासोदरगिरां
पुनस्तत्रोपेतं प्रकटमवधार्यामरगणम् ।
त्रिभिः सार्धं सार्धं विनयनतैः खण्डिकशतैः
स मौर्यः प्राव्राजीत् परमपदलिप्सुर्द्विजवरः ॥ ५१ ॥

इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये व्यक्त-सुधर्म-मण्डित-मौर्यपुत्राणां दीक्षाग्रहणवर्णनो नाम नवमः सर्गः ।

---

## दशमः सर्गः ।

अथ श्रुत्वेन्द्रभूत्यादीन् श्रेयःश्रामण्यसंश्रितान् ।
अकम्पितोऽप्युपाध्यायो वीरं वन्दितुमाययौ ॥ १ ॥
अभाषत जगन्नाथोऽप्यकम्पित ! किमूहसे ।
तिर्यङ्-नरा-मराः सन्तु नारकाः सन्ति वा नवा ॥ २ ॥
प्रकटं वीक्ष्य ज्योतिष्कान् प्रतीतिस्ते सुरेष्वपि ।
तिर्यङ्नरास्तु प्रकटाः प्रेक्ष्यन्ते नाऽत्र संशयः ॥ ३ ॥
तुरीयगतिरुच्येत जीवानां निरयाह्वया ।
नेक्षितास्तद्गता जीवा गृहीता न च लिङ्गतः ॥ ४ ॥
अत आरेकसे तत्रास्तित्व-नास्तित्वचिन्तया ।
परं यन्न त्वदध्यक्षं तदप्रत्यक्षमेव न ॥ ५ ॥ त्रिभिः सम्बन्धः,

सन्ति यद्यपि सिंहाद्याः केषांचिद् नाक्षिगोचराः ।
तथापि ते च केषांचित् प्रत्यक्षा वनवासिनाम् ॥ ६ ॥
त्वदप्रत्यक्षेऽपि तथा प्रत्यक्षा मम नारकाः ।
तान् प्रतीहि मदुक्त्यैव प्रमाणं यत आप्तवाक् ॥ ७ ॥
प्रत्यक्षं मन्यसे यत् त्वं प्रत्यक्षं तन्न तत्त्वतः ।
इन्द्रियोद्भवविज्ञानं परोक्षं तत्तु तात्त्विकम् ॥ ८ ॥
उणादिकोऽक्षशब्दो यः स्याद् व्याप्त्यर्थाशिधातुजः ।
तद्वाच्य आत्मा, प्रति तं गतं प्रत्यक्षमुच्यते ॥ ९ ॥
शाब्दिकैरक्षिशब्देन प्रत्यक्षं यत् प्रसाधितम् ।
तत्तु चाक्षुषमेव स्याद् न स्याद् रासनादिकम् ॥ १० ॥
प्रत्यक्षतानिवेशार्थमत्र या काऽपि कल्पना ।
सा गौरवात् कथं ग्राह्या पूर्वोक्तौ लाघवं यदि ॥ ११ ॥
इन्द्रियाणि पराण्येवाऽऽत्मनस्तेन परोक्षता ।
इन्द्रियोद्भवविज्ञाने गौणत्वं यत आत्मनः ॥ १२ ॥
आत्मोपचारतश्चैतदपि प्रत्यक्षमस्तु ते ।
घृतमायुरिति ख्यातिर्यतः सत्या प्रवर्तते ॥ १३ ॥
तव प्रत्यक्षविज्ञाने सत्या चैवं परोक्षता ।
प्रत्यक्षं सकलं यन्मे तेन पश्यामि नारकान् ॥ १४ ॥
अनन्यदृष्टं भावं ते निरीक्षे चेन् मनोगतम् ।
तदा प्रतीहि सकलं प्रत्यक्षमपि वर्तते ॥ १५ ॥
अतश्चेद् न परितोषोऽर्थापत्तिमानमाश्रय ।
बहुधा साधितं वस्तु दृढतामश्नुते यतः ॥ १६ ॥
अन्यथाऽनुपपत्त्येकलक्षणात् किल हेतुतः ।
अर्थापत्तिः प्रमाणं स्यात् पीनोऽयं रात्रिभुग् यथा ॥ १७ ॥
उत्कृष्टसुखभोगाय यथा देवाः प्रतिष्ठिताः ।
तथैवैकान्तदुःखाय विना नैरयिकांस्तु के ? ॥ १८ ॥
नैकान्तदुःखभोक्तारस्तिर्यञ्चोऽपि नरा अपि ।
दुःखाद् विश्रान्तिरेतेषां काले काले विलोक्यते ॥ १९ ॥
नारकैरुपमेयास्युर्ये चाऽप्यत्यन्तदुःखिताः ।
तिर्यञ्चो वा मनुष्या वा तस्मात् सन्तः कथं न ते ? ॥ २० ॥
भावे भावोपमैव स्याद् न त्वभावोपमोचिता ।
वाच्याः शुद्धपदेनैते नाभावा नारकास्ततः ॥ २१ ॥

इत्यादियुक्तिभिर्बुद्धः सह छात्रैस्त्रिभिः शतैः ।
अकम्पितोऽपि चारित्रं सामायिकमुपाददे ॥ २२ ॥
आत्मनो मोक्षकार्याय निशम्य प्रस्थितान् मुनीन् ।
अभ्यागतोऽचलभ्रातोपाध्यायश्छात्रसम्पदा ॥ २३ ॥
जगाद जगतां नाथः प्रेक्ष्यासन्नशिवं च तम् ।
भ्रान्तस्त्वमचलभ्रातर्विकल्पैः पुण्यपापयोः ॥ २४ ॥
पुण्यमेवास्ति दुःखं तु स्यात् किं ? तदपकर्षतः, ।
पापमेवाऽस्ति किं वाऽत्र सुखं ? तदपकर्षतः, ॥ २५ ॥
स्यातां विविक्ते वा ते द्वे स्वर्णदी-यमुने इव, ।
पुण्य-पापमयं वस्तु किमेकं वर्णभेदवत्, ॥ २६ ॥
अथवा सुखदुःखानि स्वभावादुद्भवन्ति चेद् ।
किमु तेषां निमित्तत्वे पुण्य-पापप्रकल्पनम् ?, ॥ २७ ॥
एतेषु च विकल्पेषु तुर्योऽस्माकमपीहितः ।
पुण्य पापमयं वस्तु कर्म पौद्गलिकं यतः ॥२८॥ चतुर्भिः स०
उपेत्य भगवानाद्यान् पञ्चमश्चेह चर्च्यते ।
कोऽयं वस्तुविशेषः स्याद् यः स्वभावोऽभिधीयते ? ॥ २९ ॥
स वा मूर्तोऽस्त्यमूर्त्तो वा ब्रूहि यत्तेऽभिरोचते ? ।
मूर्तत्वे कर्मणः सिद्धावस्माकं सिद्धसाध्यता ॥ ३० ॥
आकाशवदमूर्त्तत्वे कार्येऽस्य स्यादकर्तृता ।
प्रतिज्ञाते विरोधस्ते भवेदेवं महामते ! ॥ ३१ ॥
स्वभावो वस्तुधर्मश्चेत् तदाऽसौ यस्य वस्तुनः ।
तस्य मूर्तममूर्तं वेत्यत्राप्येषैव कल्पना ॥ ३२ ॥
अमूर्तत्वे त्वकर्तृत्वं मूर्तत्वे सिद्धसाध्यता ।
पुण्यपापस्वभावं यद् वस्तु कर्म प्रतिष्ठितम् ॥ ३३ ॥
स्वभावशब्दवाच्योऽर्थश्चेदकारणता भवेत् ।
तदा समस्तभावानामेकदैव समुद्भवः ॥ ३४ ॥
पदार्थाकस्मिकोत्पत्तौ नियताकारता च न ।
दृष्टाऽभ्राणां विकारे न नियताकारता यतः ॥ ३५ ॥
सम्भवः सुखदुःखानां स्वभावाच्चेद् भवेत् तदा ।
स्रक्-चन्दन-विषादीनां हेतूनां स्यादहेतुता ॥ ३६ ॥
अत्यन्तानुलब्धेष्वपि स्वभावे कर्तृता यदि ।
तदा कर्मणि संसिद्धे कर्तृता किं निषिध्यते ? ॥ ३७ ॥

कर्मसिद्धिस्त्वग्निभूतेर्वादे चैव प्रपञ्चिता ।
पुण्य-पापस्वभावाभ्यां वैशिष्ट्यमिह सम्मतम् ॥ ३८ ॥
विंशत्युत्तरमानङ्काः कर्मप्रकृतयः शतम् ।
आत्मन्यत्र शुभाः पुण्या अपराः पापसञ्ज्ञिकाः ॥ ३९ ॥
सातकर्मोदयादाशु प्रजायेत सुखं फलम् ।
असातकर्मप्रभवं फलं दुःखाय जायते ॥ ४० ॥
यथाऽऽत्मपरिणामत्वात् सुख-दुःखे अरूपिणी ।
तथैव कारणे किं न पुण्यपापे उभे अपि ? ॥ ४१ ॥
विकल्पोऽयमपि त्याज्यः सर्वे भावा यतः स्थिताः ।
तुल्यातुल्यत्वरूपेण दोषः कोऽपि ततोऽत्र न ॥ ४२ ॥
सुखस्य हेतवो मूर्ताः प्रायः स्रक्-चन्दनादयः ।
एवमेवासुखस्यापि विषा-ऽहि-कण्टकादयः ॥ ४३ ॥
तुल्यातुल्यत्वरूपेण कार्य-कारणताऽत्र चेत् ।
तदा पुण्यं च पापं च मूर्तत्वेन कथं न हि ? ॥ ४४ ॥
सुवर्णादिगुणं सम्यग्विपाकं पुद्गलव्रजम् ।
जीवस्थं सत्क्रियोद्भूतं सर्वं पुण्यमिति स्मृतम् ॥ ४५ ॥
यदेतद् विपरीतं तत् सर्वं पापमिति स्मृतम् ।
एतद्द्वयमपि ज्ञेयं नातिसूक्ष्मं न बादरम् ॥ ४६ ॥
साम्यं वास्तवबोधे तु कार्य-कारणयोरपि ।
तथा च सत्यं कार्यानुरूपं कारणमुच्यते ॥ ४७ ॥
जीवस्यापि परिणामः सुख-दुःखाभिधानकः ।
तद्द्योगात् तेन कार्यानुरूपं कारणमुच्यते ॥ ४८ ॥
ततः पुण्यं च पापं च सिद्धं पूर्वोक्तयुक्तिभिः ।
पुद्गलस्कन्धमेवैकं विविधं चित्रिपत्रवत् ॥ ४९ ॥
पुण्य पापद्वये सिद्धे पक्षौ केवलयोस्तयोः ।
अयुक्तावेव मन्तव्यौ सुयुक्तेरक्षमत्वतः ॥ ५० ॥
इत्यादियुक्तिप्रतिबन्धशुद्धचित्तोऽचलभ्रातृबुधः प्रबुद्धः ।
समन्वितश्छात्रशतत्रयेण दीक्षां ललौ वीरजिनेन्द्रशिष्टाम् ५१

इति श्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये अकम्पिता-
चलभ्रातृदीक्षावर्णनो नाम दशमः सर्गः ।

# एकादशः सर्गः ।

श्रीवीरपादाम्बुजचञ्चरीकान् निशम्य सूरीनपरान् प्रबुद्धान्
मेतार्यनामाऽपि सुधीः सुधीभिः समं समेयाय जिनोपकण्ठे ॥ १ ॥
आभाष्य तं वीरजिनेश्वरोऽपि जगाद वत्सेह जहाहि मोहम् ।
चिरन्तनं किं परलोकवस्तु स्याद्वा नवेति स्वमनःप्रसक्तम् ॥ २ ॥
यच्चेतना भौतिकदेहधर्मस्तदत्यये जन्मकुतोऽन्यलोके ? ।
यद्वाऽरणेर्वह्निरिवेयमस्मादुत्पद्यते नापि ततोऽन्यलोकः ॥ ३ ॥
पानीयचन्द्रप्रतिबिम्बवद्वा तनौ तनौ ब्रह्मपृथक्प्रकाशः ।
तथापि देहापगमेऽन्यलोकं प्रयाति कश्चेति विकल्पसे किम् ? ॥ ४ ॥
शृणोषि शास्त्रेषु शरीरभाजां देहच्युतौ चापि भवान्तराप्तिम् ।
विरुद्धवादेन मुहुस्तवैवं दोलाचलं चित्तमभूद् वृथैव ॥ ५ ॥
अत्रास्ति चेदुत्तरपक्षकाङ्क्षा त्वं पृच्छ तद् गौतमवायुभूतिम् ।
भूतातिरिक्तः प्रकटोऽयमात्मा त्वयाऽवबुद्धोऽत्र कयोपपत्त्या ॥ ६ ॥
तमेव दध्याः प्रतिवादितायां पूर्वे विकल्पे स समाधिकारी ।
तथाऽऽत्मसिद्ध्यै पुनरिन्द्रभूतिं पृच्छ त्वमेवाऽत्र सुतं बहूक्त्या ॥ ७ ॥
प्रतीहि देवानपि नारकान् वा तथान्यलोकाधिगमाय धीमन् ! ।
तं मौर्यपुत्रं तमकम्पितं वा समाधये पर्यनुयुङ्क्ष्व भद्र ! ॥ ८ ॥
यन्मन्यसे ब्रह्मकृतः प्रकाशस्तनौ तनावस्ति मृषेति वाणी ।
यल्लक्षणैर्भेदि तदेव भिन्नं विशेषतश्चापि यथा घटादि ॥ ९ ॥
सुखित्वदुःखित्वमुखाः विभेदाः सर्वत्र सन्तीह पृथक् पृथग् यत् ।
तदात्मभेदात् परलोकयानं सम्भाव्यते किं न सदुक्तयुक्त्या ? ॥१०॥
ब्रह्मैक्यवादे परकर्मभोगः परस्य युज्येत न चैतदिष्टम् ।
सुखस्य दुःखस्य च संकरत्वे विलुप्यते तद्व्यवहारभावः ॥ ११ ॥
तेनायमात्मा प्रतिदेहभिन्नः स्वकर्मभिर्भूरिभवानुसारी ।
स्थाने स जातिस्मरणेन कश्चित् पश्येत् तु पूर्वाणि भवान्तराणि ॥१२॥
तदेन्द्रभूत्यादिभिरप्यभीष्टैः प्रसाधितोत्साहभरः समाधौ ।
मेतार्यविप्रोऽपि बभूव भव्यो महाव्रती च्छात्रशतत्रयेण ॥ १३ ॥
ततः प्रभासाह्वयपाठकोऽपि श्रुत्वा पराञ्च् छान्तिसुखं प्रयातान् ।
श्रीमज्जगन्नाथसदस्तडागं समाययौ तृष्णगिवामृतस्य ॥ १४ ॥
देवाधिदेवोऽप्यवदत् प्रभास ! प्रकम्पयेत् त्वामिति वेदवाणी ।
यद्धव्यमाजीवनमेव यत्तु स्वर्गाप्तये तद् न च मोक्षहेतोः ॥ १५ ॥

योगो हि सावद्यविधिस्वरूपो मोक्षः कुतो स्यादिति मुक्तिलोपः ।
गुहा हि लोकस्य सुदुर्विगाहेति वेदवाक्येन च मोक्षसिद्धिः ॥१६॥
द्वाभ्यां संबन्धः ।
दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद् विदिशं न कांचित् स्नेहक्षयात् केवलमेति शान्तिम् १७
जीवस्तथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति चान्तरिक्षम् ।
दिशं न कांचिद् विदिशं न कांचित् क्लेशक्षयात् केवलमेति शान्तिम् १८
यत् सौगतानामिति युक्तितोऽपि वर्तेत ते चेतसि मुक्तिलोपः ।
कर्मक्षयाद् निर्जर-नारकादिपर्यायनाशे तु न चातिरिक्तम् ॥ १९ ॥
एवं विकल्पैर्बहुसंशयानस्तिष्ठेरिहादत्स्व मदुक्तयुक्तीः ।
याभिर्मनस्ते स्थिरतामुपेयात् सत्याग्रतो वा कियती मृषोक्तिः ॥२०॥
प्रवृत्तिमार्गाश्रयिमूढलोकान् यष्टव्यमाजीवनमेतदुक्तम् ।
निवृत्तिमार्गाश्रयिणां तु मुक्तिर्निषिध्यते क्वापि न वेदवाक्यैः ॥२१॥
तथाहि मुद्राऽङ्गद-कङ्कणादि-पर्यायनाशेऽपि न हेमनाशः ।
तथैव मर्त्यामरनारकादिपर्यायनाशेऽपि न जीवनाशः ॥ २२ ॥
दृष्टान्तभूतेऽपि तव प्रदीपे न सर्वथैवाभिहितो विनाशः ।
यतः प्रदीपाह्वयवस्तुनाशेऽप्यनश्वरत्वं स्फुटमस्त्यणूनाम् ॥ २३ ॥
आर्द्रेन्धनोपाधिवशो यथाग्निः कृष्णं परिणाममियर्ति धूमे ।
स्नेहक्षयाद् वह्न्यणवस्तथैव विशीर्य कार्ष्ण्येन तमो मिलन्ति ॥ २४॥
तथाहि निर्वाणदशेन्धनाणून् गृह्णाति तद्गन्धगुणेन नासा ।
द्रव्यत्वतस्तेन समस्तभावा विनाशिनो नैव कदापि वाच्याः ॥ २५ ॥
अनादिबन्धच्युतिरेव मुक्तिर्यत्रोल्लसेद् द्रव्यतयैव जीवः ।
चश्चिदानन्दमयः परात्मा दृषत्पृथग्भूतसुवर्णतुल्यः ॥ २६ ॥
अनादिसंयोगवतोर्यथेष्टः पाषाणधात्वोरनलेन भेदः ।
तथाऽऽत्मकर्मव्यतिभेदसिद्धिं ज्ञान-क्रियाभ्यामवगच्छ विद्वन् ! ॥२७॥
मोक्षस्तु सन् शुद्धपदत्वशक्त्या खपुष्पवद् नैव कदाप्यसन् सः ।
मुक्तस्य भूयोऽथ न कर्मबन्धो मोक्षस्थितिस्तेन हि साद्यनन्ता ॥२८॥
उत्पद्यमानोऽपि यथेह कालः प्रवाहरूपेण भवेदनादिः ।
तथैव मोक्षः समकर्मघातादुत्पद्यमानोऽपि भवेदनादिः ॥ २९ ॥
तुच्छेन्द्रियज्ञानमपि स्वदेहाद् भिन्नस्य यस्यास्ति गुणप्रकाशः ।
समस्तबोधावरणक्षयेण स तत्र तस्य प्रतिभात्यनन्तः ॥ ३० ॥
त्रिभागहीनस्वशरीरमाने क्षेत्रे स्थितिर्यस्य स विश्वमौली ।

विश्वेश्वरश्चिन्मयमूर्तिरेव स्पृष्टो निराबाधमनन्तमुक्तैः ॥ ३१ ॥
चेत् पुण्य-पापक्षयतस्तु मुक्तिस्तदा सुखं दुःखमुभे न तत्र।
मुक्तस्ततो निःसुख-दुःख एव व्योमेव सौम्येति मतिं विमुञ्च ॥ ३२ ॥
यदस्ति देहेन्द्रियजं सुखं तद् दुःखानुषङ्गाद् ननु दुःखमेव।
निरीहताख्यं यदात्मसौख्यं निरीहसाधोरिव तत्र तत् स्यात् ॥ ३३ ॥
अनिष्टसंयोगभयाभिलाषरोगाद्यभावेन च यत् प्रसिद्धम्।
यत् सर्ववित्तेश्वरतोपलब्धं तदक्षयं सौख्यमनन्तमत्र ॥ ३४ ॥
समस्तसौख्यं तु जगत्त्रयस्थं यद्येकराशीक्रियते कथंचित्।
तथापि नानन्ततमेऽपि भागे तद् मुक्तसुखस्य तुलां विदध्यात् ॥३५॥
जगद्गुरोर्वक्त्रसरोजगर्भाद् विनिर्गतानीति वचोऽक्षराणि।
निशम्य सम्यक् परिपीय तत्त्वं शिवोत्सुकोऽभूद् मतिमान् प्रभासः॥३६॥
ततः समं शिष्यशतत्रयेण प्रव्रज्य सावद्यविधेर्विरक्तः।
पूर्वप्रबुद्धर्षिसमाजराजौ दर्भासनं मेध्यमलंचकार ॥ ३७ ॥
इत्थं मनःसंशयमार्जनेन श्रीवीरदत्तत्रिपदीसुबीजात्।
कलृप्त्वाऽङ्गपूर्वाणि गणाधिनाथा एकादशापि प्रथिता बभूवुः ॥ ३८ ॥
विहृत्य भूमौ प्रतिबोध्य संघं चतुर्विधं वीरजिनाज्ञयैते।
सम्प्रेषयामासुरिमं भवाब्धेर्निस्तार्य मुक्तिं त्रिदशालयं वा ॥ ३९ ॥
इत्थं तीर्थपतिः समेत्य विदिताऽपापानगर्यन्तिके
रम्ये श्रीमहसेननामनि वने संदर्श्य विश्वेशताम्।
मिथ्यात्वं परिमार्ज्य याज्ञिकनृणां छित्त्वा च तत्संशयान्
स्वीयं मुक्तिपथप्रचारचतुरं प्रावीवृतच्छासनम् ॥ ४० ॥
भव्याम्भोरुहबोधने दिनकरस्त्रिशत्समा भूतले
मोहाज्ञानतमोभरं विघटयन् यो धर्मराज्यं व्यधात्।
यश्चाह्नाय निनाय जन्तुनिकरं स्वर्गापवर्गालयं
स श्रीवीरजिनेश्वरो भवतु नः संघस्य च श्रेयसे ॥ ४१ ॥

इति वाचनाचार्यश्रीदयासिंहगणिशिष्यश्रीकविरूपचन्द्रविरचिते गौतमीये महाकाव्ये मेतार्य-प्रभासदीक्षाग्रहणवर्णनो नामैकादशः सर्गः।

# प्रशस्तिः ।

संघच्छैल-वियद्गजोडुप (१८०७) मिते मासे सहस्यादिमे
पक्षे दक्षसुताऽधिनाथदिवसे शुद्धे तृतीयातिथौ ।
श्रीमद्योधपुरे कमध्वजरवौ श्रीरामसिंहे नृपे
श्रीमच्छ्रीजिनलाभसूरिगणभृद्राज्ये पुनर्धार्मिके ॥ १ ॥
विद्याचारवरे गणे खरतरे श्रीक्षेमकीर्त्यन्वये
संजाता भुवि शान्तहर्षगणयः श्रीवाचकाख्याभृतः ।
तच्छिष्या जिनहर्षनाममुनयो वैरङ्गिकाग्रेसराः
तच्छिष्याः सुखवर्धना अपि दयासिंहास्तदीयास्तथा ॥ २ ॥
तच्छिष्योऽभयसिंहनामनृपतेर्लब्धप्रतिष्ठो महा-
गम्भीरार्हतशास्त्रतत्त्वरसिकोऽहं रूपचन्द्राह्वयः ।
प्रख्याताऽपरनामरामविजयो गच्छे स दत्ताख्यया
काव्येऽकार्षमिमं कवित्वकलया श्रीगौतमीये श्रमम् ॥ ३ ॥
दोषाः शब्दसमुद्भवाः कतिपयालंकारदोषाः पुनः
पद्येष्वेषु मम प्रमादवशतश्चेत् संभवेयुः क्वचित् ।
गीतार्थास्तु तथापि युक्तिकविताकार्यै श्रमं प्रेक्ष्य मे
साधो ! साधु कृतं त्वयेति ददतामुत्साहमेवेप्सितम् ॥ ४ ॥

इति ग्रन्थकृतकृता प्रशस्तिः ।



# विज्ञप्तिः

## 'मुनिश्रीमोहनलालजीजैनग्रन्थमाला'

अस्याः प्रथमाङ्कत्वेन हेमहंसगणिविरचितं पद्यात्मकं सार्धसहस्रत्रयश्लोकमितं पार्श्वनाथचरिताख्यं महाकाव्यमल्पसमय एव प्रकटयिष्यते; तत्तु ग्राहकाणामुपदीकरिष्यते; ये चास्याः स्थायिग्राहका भवेयुस्तेभ्यो सर्वाणि पुस्तकान्यर्धमूल्येन मीलिष्यन्ति, तानि च यदा यदा प्रकटीभविष्यन्ति तदा तदा तैरवश्यमेव ग्रहणीयानीति स्थायिग्राहकत्वेन बुभूषुभी रूप्यकमेकं प्रेष्य प्रथमत एव स्वनामोल्लेखः कार्यः; तच्च रूप्यकं वर्षत्रयानन्तरमेव मुमुक्षुभ्यो ग्राहकेभ्यो मीलिष्यति; ये च स्थायिग्राहकीभूता वर्षत्रयाभ्यन्तर एवापजिगमिषवो भविष्यन्ति तेषां दत्तं द्रव्यं न प्रतिनिवृत्तं भविष्यति; ग्राहकैः पोष्टव्ययद्रव्यं भिन्नमेव ज्ञेयम् । आयतौ चास्यां ग्रन्थमालायां सप्तसंधानमहाकाव्य-चन्द्रकेवलिचरित्र-नैषधीयपादपूर्त्ति-सटीकगौतमीयमहाकाव्य-लघुत्रिषष्टिशलाकापुरुषचरित्र-सटीकद्व्याश्रयमहाकाव्यप्रभृतीनि पुस्तकानि प्राकट्यं नेष्यन्त इति ॥

मैनेजर—

मुनिश्रीमोहनलालजीजैनग्रन्थमाला,

बनारस सीटि ।

श्रीलक्ष्मी नारायण प्रेस जतनबड़, बनारसमें गणपति कृष्ण गुर्जर द्वारा मुद्रित ।